वेदवेदान्तयोर्गुह्यं पुराकल्पे प्रचोदितम् ।
नाप्रशान्ताय दातव्यं नाशिष्याय च वै पुनः ॥७५॥
यस्य देव्यां परा भक्तिर्यथा देव्यां तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥७६॥

महाकाल उवाच ॥

गुह्योपनिषदित्येषा गोप्यात् गोप्यतरा सदा ।
चतुर्भ्यश्चापि वेदेभ्य एकीकृत्यात्र योजिता ॥७७॥
उपदिष्टा च सर्गादौ सर्वानेव दिवौकसः ।
एवंविधं च यद्ध्यानमेवंरूपं च कीर्तितम् ॥७८॥
सा सपर्या परिज्ञेया विधानमधुना शृणु ।
सोऽहमस्मीति प्रथमं सोऽहमस्मि द्वितीयकम् ॥७९॥
तदस्म्यहं तृतीयं च महावाक्यत्रयं भवेत् ।
आद्यान्येतानि वाक्यानि छन्दांसि परिचक्षते ॥८०॥
देवता गुह्यकाली च रजःसत्त्वतमोगुणाः ।
सर्वेषां प्रणवो बीजं हंसः शक्तिः प्रकीर्तिता ॥८१॥
मकारश्चाप्यकारश्च ह्युकारश्चेति कीलकम् ।

एभिर्वाक्यत्रयैः सर्वं कर्म प्रोतं विधानतः ॥८२॥
अनुक्षणं जपंश्चैव निश्चयः परिकीर्तितः ।
द्वितीयोपासकानां हि परिपाटीयमीरिता ॥८३॥
एवं चाप्यातुरो यस्तु मनुष्यो भक्तिभावितः ।
विमुक्तः सर्वपापेभ्यः कैवल्यायोपकल्पते ।
सर्वाभिः सिद्धिभिस्तस्य किं कार्यं कमलानने ॥८४॥

॥ इति श्रीमहाकालसंहितायां गुह्यकाल्युपनिषत् समाप्ता ॥

२

॥ श्रीगुह्यकालीकवचम् ॥

नमः श्रीकालिकायै ॥

भैरव्युवाच ॥

भगवन् श्रोतुमिछामि मानवेकेन हेतुना ।
मन्त्राः परांगमुखा कोटिजप्ता अपि प्रभो ॥१॥

श्रीभैरव उवाच ॥

एतद्रहस्यं कथयामि त्वयि प्रिये ।
गोपितव्यं प्रयत्नेन स्वयोनिमिव वल्लभे ॥२॥
कवचेन विनायस्तु कालीमन्त्रजपोद्यतः ।
स न सिद्धिमवाप्नोति कोटिकल्पशतैरपि ॥३॥
कवचं पंचकं ज्ञेयं प्रथमं देहरक्षकं ।
द्वितीयं नाम संगुप्तं तृतीयं शस्त्रभूषितं ॥४॥
चतुर्थं बीजजशक्त्यादि भूषितं पंचमं शृणू ।
मन्त्रभूतं वरारोहे भुवि सर्वार्थसाधनं ॥५॥
अस्यदेहरक्षकं कवचस्यकालाग्निरुद्रऋषिरनुष्टुप्छन्दः ।
श्रीमहागुह्यकालीदेवता।
फ्रें बीजं । स्वाहा शक्तिः ।
शेषकीलकं मम देहरक्षणे विनियोगः ॥
इति बद्धांजलिदेवीं मनसाध्यात्वा पठेद् ॥६॥
फ्रें शिरो मे कालिका पातु भालं गुह्यस्वरूपिणी ।
प्रकटाख्या दृश्यै पातु विकटाख्या मम श्रुति ॥७॥

द्रंष्टिनी नासिके पायान्तु मुखं मे घोर रूपिणी ।
अट्टाट्टहासी रसनं कण्ठं मे मुण्डमालिनी ॥८॥
स्कंधौ मेघप्रभा पातु भुजौ मे खर्वकालिका ।
जयप्रदा करौ पातु हृदयं चण्डघण्टिका ॥९॥
वक्षः कुलेश्वरी पातु हस्तं शक्तिप्रिया मम ।
पार्श्वौ मे जटिनी पायाद् योगिनी चक्रचारिणी ॥१०॥
ललज्जिह्वा पातु कुक्षिं मध्यं दानवघातिनी ।
नाभिं घोरमुखी पायात् नरचर्मधारिणी जटी ॥११॥
मांसभक्ष्या शक्तिनी मेरुशोणितभोजिनी ।
खेचरी जानुनी पातु जंघा खर्परधारिणी ॥१२॥
पादौ सर्वत्र गोपायात् सर्वाङ्गं कालिका स्वाहा ।
इति ते कथितं देवि कवचं देहरक्षकम् ॥१३॥
विनानेन सिद्धिः स्यात् कल्पकोटिशतैरपि
गुरुभक्तिमते देयं न देयं यस्य कस्यचित् ॥१४॥
शान्ताय शुद्धचिन्ताय देवीभक्ताय चारिणे ।
पठित्वा कवचं देवी जपेन्मन्त्रं समाहितः ॥१५॥
उर्जटे पर्वते वापि श्मशाने वा यथा रुचिः ।
विघ्नान्तस्य संभवंति नैव कुत्रापि शोभने ॥१६॥
पुरश्चर्यादिकं सर्वं मूलवभ्परिवारयेत् ॥१७॥

॥ श्रीयोगिनीहृदयेगुह्यकालीरहस्येदेहरक्षककवचन्नामस्तोत्रम् समाप्तम् ॥

३

॥ विश्वमङ्गलगुह्यकालीकवचम् ॥

॥ विनियोग ॥

ॐ अस्य श्रीविश्वमङ्गलनाम्नोगुह्यकालीमहावज्रकवचस्य संवर्तऋषिरनुष्टुप्छन्दः । एकवक्त्रादिशतवक्त्रान्तागुह्यकाली देवता । फ्रें बीजं । स्फ्रें शक्तिः । छ्रीँ कीलकं सर्वाभीष्टसिद्धिपूर्वकात्मरक्षणे जपे विनियोगः ॥

ॐ फ्रें पातु शिरः सिद्धिकराली कालिका मम ।
ह्रीं छ्रीं ललाटं मे सिद्धिविकरालि सदावतु ॥१॥
श्रीं क्लीं मुखं चण्डयोगेश्वरी रक्षतु सर्वदा ।
हूं स्त्रीं कर्णे वज्रकापालिनी मे कालिकाऽवतु ॥२॥
ऐं क्रौं हनू कालसङ्कर्षणा मे पातु कालिका ।
क्रीं क्रौं भ्रुवावुग्रचण्डा कालिका मे सदावतु ॥३॥
हां क्षौं नेत्रे सिद्धिलक्ष्मीरवतु प्रत्यहं मम ।
हूं ह्रौं नासां चण्डकापालिनी मे सर्वदावतु ॥४॥
आं ईं ओष्ठाधरौ पातु सदा समयकुब्जिका ।
ग्लूं ग्लौं दन्तान् राजराजेश्वरी मे रक्षतात् सदा ॥५॥
जूं सः सदा मे रसनां पातु श्रीजयभैरवी ।
स्फ्रें स्फ्रें पातु स्वर्णकूटेश्वरी मे चिबुकं सदा ॥६॥
ब्लूं ब्लौं कण्ठं रक्षतु मे सर्वदा तुम्बुरेश्वरी ।
क्ष्रूं क्ष्रौं मे राजमातङ्गी स्कन्धौ रक्षतु सर्वदा ॥७॥

फ्रां फ्रौं भुजौ वज्रचण्डेश्वरी रक्षतु मे सदा ।
स्त्रैं स्त्रौं वक्षःस्थलं जयझङ्केश्वरी मम ॥८॥
फिं फां करौ रक्षतु मे शिवदूती च सर्वदा ।
छ्रूं छौं मे जठरं पातु फेत्कारी घोररावणी ॥९॥
स्त्रैं स्त्रौं गुह्येश्वरि नाभिं मम रक्षतु सर्वदा ।
क्षुं क्षौं पार्श्वौ सदापातु बाभ्रुवी घोररूपिणी ॥१०॥
ग्रूं ग्रौं कुलेश्वरी पातु मम पृष्ठं च सर्वदा ।
क्लूं क्लौं कटिं रक्षतु मे भीमादेवी भयानका ॥११॥
हैं हौं मे रक्षतादूरू सर्वदा चण्डखेचरी ।
स्फ्रों स्फ्रौं मे जानुनी पातु कोरङ्गी भीषणानना ॥१२॥
त्रीं श्रीं जङ्घायुगं पातु तामसी सर्वदा मम ।
ज्रैं ज्रौं पादौ महाविद्या सर्वदा मम रक्षतु ॥१३॥
ड्रीं ठ्रीं वागीश्वरी सर्वान् सन्धीन् देहस्य मेऽवतु ।
ख्रें ख्रौं शराराधातून्मे कामाख्या सर्वदावतु ॥१४॥
ब्रीं ब्रूं कात्यायनी पातु दशवायूंस्तनूद्भवान् ।
ज्लूं ज्लौं पातु महालक्ष्मीः खान्येकादश सर्वदा ॥१५॥
ऐं औं अनूक्तं यत्स्थानं शरीरेऽन्तर्बहिश्च मे ।
तत्सर्वं सर्वदा पातु हरसिद्धा हरप्रिया ॥१६॥
फ्रें छ्रीं ह्रीं स्त्री हूं शरीरसकलं सर्वदा मम ।
गुह्यकाली दिवारात्रौ सन्ध्यासु परिरक्षतु ॥१७॥
इति ते कवचं प्रोक्तं नाम्ना च विश्वमङ्गलम् ।
सर्वेभ्यः कवचेभ्यस्तु श्रेष्ठं सारतरं परम् ॥१८॥
इदं पठित्वा त्वं देहं भस्मनैवावगुण्ठ्य च ।

तत्तत्स्थानेषु विन्यस्य वद्धवादः कवचं दृढम् ॥१९॥
दशवारान् मनुः जप्त्वा यन्त्र कुत्रापि गच्छतु ।
समरे निपतच्छस्त्रेऽरण्ये स्वापदसङ्कुले ॥२०॥
श्मशाने प्रेतभूताढ्यकान्तारे दस्युसङ्कुले ।
राजद्वारे सपिशुने गह्वरे सर्पवेष्टिते ॥२१॥
तस्य भीतिर्न कुत्रापि चरतः पृथिवीमिमाम् ।
न च व्याधिभयं तस्य नैव तस्करजं भयम् ॥२२॥
नाग्न्युत्पातो नैव भूतप्रेतजः सङ्कटस्तथा ।
विद्युद्वर्षोपलभयं न कदापि प्रबाधते ॥२३॥
न दुर्भिक्षभयं चास्य न च मारिभयं तथा ।
कृत्याभिचारजा दोषाः स्पृशन्त्येनं कदापि न ॥२४॥
सहस्रं जपतश्चास्य पुरश्चरणमुच्यते ।
तत्कृत्वा तु प्रयुञ्जीत सर्वस्मिन्नपि कर्मणि ॥२५॥
वश्यकार्यो मोहने च मारणोच्चाटने तथा ।
स्तम्भने च तथा द्वेषे तथा कृत्याभिचारयोः ॥२६॥
दुर्गभङ्गे तथा युद्धे परचक्र निवारणे ।
एतत् प्रयोगात् सर्वाणि कार्याणि परिसाधयेत् ॥२७॥
भूतावेशं नाशयति विवादे जयति द्विषः ।
सङ्कटं तरति क्षिप्रं कलहे जयमाप्नुयात् ॥२८॥
यदीच्छेत् महतीं लक्ष्मी तनयानायुरेव च ।
विद्यां कान्तिं तथौन्नत्यं यश आरोग्यमेव ॥२९॥
भोगान् सौख्यं विघ्नहानिमनालस्यं महोदयम् ।
अधीहि कवचं नित्यममुनामुञ्च च प्रिये ॥३०॥

कवचेनामुना सर्वं संसाधयति साधकः ।
यद् यद् ध्यायति चित्तेन सिद्धं तत्तत्पुरः स्थितम् ॥३१॥
दुर्धटं घटयत्येतत् कवचं विश्वमङ्गलम् ।
विश्वस्य मङ्गलं यस्मादतो वै विश्वमङ्गलम् ॥३२॥
सान्निध्यकारकं गुह्यकाल्या एतत् प्रकीर्तितम् ।
भुक्तवा भोगानघं हत्वा देहान्ते मोक्षमाप्नुयात् ॥३३॥

॥ इति विश्वमङ्गल गुह्यकालीकवचम् ॥

४

॥ श्रीगुह्यकालीद्वादशनामस्तोत्रम् ॥

ईश्वर उवाच ॥

प्रथमं कालिका नाम द्वितीयं सर्वमङ्गला ।
तृतीयं कामहा चैव चतुर्थन्तु श्मशानगा ॥
पञ्चमं कामदा चैव षष्टञ्चाद्या तथैव च ।
सप्तमं शवरूढा च अष्टमं चाम्बिका तथा ॥
नवमं नागशिष्या च दशमं त्रिदशेश्वरी ।
एकादशं करालास्या श्यामा द्वादशमेव च ॥
द्वादशैतानि नामानि पठेन्नित्यं महेश्वरी ।
गोसहस्रप्रदानस्य फलं भवति सत्वरः ॥
रतौ च पठते देवी कलां नार्हन्ति षोडशीम् ।
भगस्पर्शे च पठते सर्वविद्येश्वरोभवेत् ॥
त्रिसन्ध्यं पठते देवि त्रैलोक्ये विजयी भवेत् ।
न देयं वैष्णवे सौरे गाणपत्ये महास्तवम् ॥
सत्यं सत्यं च सत्यं च देयं शैवे च शाक्तये ।

॥ श्रीहंससंहितायामीश्वरप्रोक्तं श्रीगुह्यकालिकायां द्वादशनामस्तोत्रं सम्पूर्णम् ॥

५

॥ श्रीगुह्यकालीद्वादशनामावलिः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं कालिकायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं सर्वमङ्गलायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं कामहायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं श्मशानगायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं कामदायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं आद्यायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं शवरुढायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं अम्बिकायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं नागशिष्यायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं त्रिदशेश्वर्यै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं करालास्यायै नमः ॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं श्यामायै नमः ॥

॥ श्रीगुह्यकालीद्वादशनामावलिःसम्पूर्णा ॥

६

॥ श्रीगुह्यकाल्याः अष्टोत्तशतनामस्तोत्रम् ॥

ॐ नमः गुह्यकालिकायै ॥

गुह्यकाली महाकाली गुह्यश्री गुह्यभैरवीः ।
योगेश्वरी महामाया महायोगेश्वरी शिवा ॥१॥
गुह्येश्वरी सिद्धिकाली योगिनी सिद्धयोगिनी ।
सिद्धिगुह्यमहाकालि सिद्धयोगेश्वरेश्वरी ॥२॥
चिच्चण्डगुह्यकाली च ज्वालासिद्धिकरालिका ।
सिद्धेश्वरी सिद्धलक्ष्मी भद्रकाली कपालिनी ॥३॥
ज्वालाकरालवदना गुह्यकन्या कुमारिका ।
सिद्धिगुह्यमहालक्ष्मि देवराजकुलेश्वरी ॥४॥
राजराजेश्वरीश्चैव महामङ्गलयोगिनी ।
योगमाया योगकन्या महाविद्या सुरेश्वरी ॥५॥
महाघोरा कालरात्रि कालसंकर्षिणी सुधा ।
राजेश्वरी राजलक्ष्मी राजभद्रेश्वरी स्वराः ॥६॥
कल्पगुह्या गुह्यचण्डी कुलगुह्यमहेश्वरी ।
कुलगुह्यमहाकाली वटुवामा श्रीभैरवी ॥७॥
अग्निज्वाला महाजिह्वा महावज्रनखायुधा ।
ज्वालाग्निगुह्यकाली च ब्रह्मकङ्कालमालिनी ॥८॥
महाकाली महागुह्ये महाकाली महोदया ।
चितिगुह्यमहाकाली त्रिमुखी वज्रदृष्टिनी ॥९॥
नववक्त्रा विभिषणा बहुनेत्रा बहुपदा ।

बहुरूपा महाकाली जयमङ्गलयोगिनी ॥१०॥
जयश्रीमङ्गलादेवी नित्यक्लिन्नायोगिनी ।
त्रैलोक्यमोहजननी स्वभक्तज्ञानदायनी ॥११॥
रुद्रचण्डा महाचण्डा कालचण्डा कुलेश्वरी ।
श्रीमहागुह्यकालि च जगन्माता जगन्मयि ॥१२॥
महाकाली गुह्यकाली सर्वमङ्गलमङ्गला ।
महोग्रगुह्यकालि च गुह्यभैरवयोगिनी ॥१३॥
महाकौलगुह्यकालि महाकौलेश्वरेश्वरी ।
कुलाकुला महातत्वा नित्यतृप्ता निराश्रया ॥१४॥
ब्रह्मविद्या जगद्धात्री वशिष्ठाश्रययोगिनी ।
श्रीगुह्या च महादेवी कुलमार्तण्डयोगिनी ॥१५॥
श्रीशक्तिगुह्यकालि च महाभैरववाहिनी ।
शतगुह्यमहाकालि ताम्राक्षि गुह्यकालिका ॥१६॥
विदान्न वेदा सर्वज्ञा सर्वलोकैकसाक्षिणी ।
श्मशानभैरवीकाली महाघोरा प्रपुजिता ॥१७॥
ज्वालाख्याकालिकाश्चैव महासंहारकालिका ।
स्थितचण्डमहाकालि सृष्टि शिवङ्करी नित्या ॥१८॥
परंज्योति परंगुह्यगुह्यकालीति कीर्तिता ।
विनिवृत्त्या प्रयोज्योवै नाम्नामष्टोत्तरं शतम् ॥१९॥
अतिगुह्यतरं दिव्यं सर्वाम्नायेषु गोपितम् ।
सारात् सार त्तरं भद्रे देवतन्त्रेषु कीर्तनम् ॥२०॥
सकृज्जप्ता गुह्यकाल्या चतुर्वगफलं भवेत् ॥२१॥

॥ श्रीगुह्यकाल्या: अष्टोत्तशतनामस्तोत्रं सम्पूर्णम् ॥

७

॥ श्रीगुह्यकालीदेव्या:अष्टोत्तशतनामावलिः ॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें गुह्यकाल्यै नमः ॥१॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें महाकाल्यै नमः ॥२॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें गुह्यश्रियै नमः ॥३॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें गुह्यभैरव्यै नमः ॥४॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें योगेश्वर्यै नमः ॥५॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें महामायायै नमः ॥६॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें महायोगेश्वर्यै नमः ॥७॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें शिवायै नमः ॥८॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें गुह्येश्वर्यै नमः ॥९॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धिकाल्यै नमः ॥१०॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें योगिन्यै नमः ॥११॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धयोगिन्यै नमः ॥१२॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धिगुह्यमहाकाल्यै नमः ॥१३॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धयोगेश्वरेश्वर्यै नमः ॥१४॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें चिच्चण्डगुह्यकाल्यै नमः ॥१५॥

ॐफ्रेंह्रीँछ्रीँहूँस्त्रीँफ्रेंज्वालासिद्धिकरालिकायैनमः॥१६॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धेश्वर्यै नमः ॥१७॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें सिद्धलक्ष्म्यै नमः ॥१८॥

ॐ फ्रें ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रें भद्रकाल्यै नमः ॥१९॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कपालिन्यै नमः ॥२०॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें ज्वालाकरालवदनायै नमः ॥२१॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें गुह्यकन्यायै नमः ॥२२॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कुमारिकायै नमः ॥२३॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें सिद्धिगुह्यमहालक्ष्म्यै नमः ॥२४॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें देवराजकुलेश्वर्यै नमः ॥२५॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें राजराजेश्वर्यै नमः ॥२६॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें महामङ्गलयोगिन्यै नमः ॥२७॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें योगमायायै नमः ॥२८॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें योगकन्यायै नमः ॥२९॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें महाविद्यायै नमः ॥३०॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें सुरेश्वर्यै नमः ॥३१॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें महाघोरायै नमः ॥३२॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कालरात्र्यै नमः ॥३३॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कालसंकर्षिण्यै नमः ॥३४॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें सुधायै नमः ॥३५॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें राजेश्वर्यै नमः ॥३६॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें राजलक्ष्म्यै नमः ॥३७॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें राजभद्रेश्वर्यै नमः ॥३८॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें स्वरायै नमः ॥३९॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कल्पगुह्यायै नमः ॥४०॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें गुह्यचण्ड्यै नमः ॥४१॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कुलगुह्यमहेश्वर्यै नमः ॥४२॥

ॐ फ्रें ह्रीं छ्रीं हूँ स्त्रीं फ्रें कुलगुह्यमहाकाल्यै नमः ॥४३॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं वटुवामायै नमः ॥४४॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं श्रीभैरव्यै नमः ॥४५॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं अग्निज्वालायै नमः ॥४६॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं महाजिह्वायै नमः ॥४७॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं महावज्रनखायुधायै नमः ॥४८॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं ज्वालाग्निगुह्यकाल्यै नमः ॥४९॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं ब्रह्मकङ्कालमालिन्यै नमः ॥५०॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं महाकालीमहागुह्यायै नमः ॥५१॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं महाकालीमहोदयायै नमः ॥५२॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं चितिगुह्यमहाकाल्यै नमः ॥५३॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं त्रिमुख्यै नमः ॥५४॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं वज्रदृष्टिन्यै नमः ॥५५॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं नववक्त्रायै नमः ॥५६॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं विभिषणायै नमः ॥५७॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं बहुनेत्रायै नमः ॥५८॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं बहुपदायै नमः ॥५९॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं बहुरूपामहाकाल्यै नमः ॥६०॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं जयमङ्गलयोगिन्यै नमः ॥६१॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं जयश्रीमङ्गलादेव्यै नमः ॥६२॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं नित्यक्लिन्नायोगिन्यै नमः ॥६३॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं त्रैलोक्यमोहजनन्यै नमः ॥६४॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं स्वभक्तज्ञानदायिन्यै नमः ॥६५॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं रुद्रचण्डायै नमः ॥६६॥

ॐ फ्रैं ह्रीँ छ्रीँ हूँ स्त्रीँ फ्रैं महाचण्डायै नमः ॥६७॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें कालचण्डायै नमः ॥६८॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें कुलेश्वर्यै नमः ॥६९॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें श्रीमहागुह्यकाल्यै नमः ॥७०॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें जगन्मातायै नमः ॥७१॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें जगन्मय्यै नमः ॥७२॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महाकालगुह्यकाल्यै नमः ॥७३॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें सर्वमङ्गलमङ्गलायै नमः ॥७४॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महोग्रगुह्यकाल्यै नमः ॥७५॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें गुह्यभैरवयोगिन्यै नमः ॥७६॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महाकौलगुह्यकाल्यै नमः ॥७७॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महाकौलेश्वरेश्वर्यै नमः ॥७८॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें कुलाकुलायै नमः ॥७९॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महातत्वायै नमः ॥८०॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें नित्यतृप्तायै नमः ॥८१॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें निराश्रयायै नमः ॥८२॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें ब्रह्मविद्यायै नमः ॥८३॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें जगद्धात्रीयै नमः ॥८४॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें वशिष्ठाश्रययोगिनीयै नमः ॥८५॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें श्रीगुह्यायै नमः ॥८६॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महादेव्यै नमः ॥८७॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें कुलमार्तण्डयोगिन्यै नमः ॥८८॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें श्रीशक्तिगुह्यकाल्यै नमः ॥८९॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महाभैरववाहिन्यै नमः ॥९०॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें शतगुह्यमहाकाल्यै नमः ॥९१॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें ताम्राक्ष्यै नमः ॥९२॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें गुह्यकालिकायै नमः ॥९३॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें विदान्नवेदायै नमः ॥९४॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें सर्वज्ञायै नमः ॥९५॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें सर्वलोकैकसाक्षिण्यै नमः ॥९६॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें श्मशानभैरवीकाल्यै नमः ॥९७॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महाघोरायै नमः ॥९८॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें प्रपुजितायै नमः ॥९९॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें ज्वालाख्याकालिकायै नमः ॥१००॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें महासंहारकालिकायै नमः ॥१०१॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें स्थित्यै नमः ॥१०२॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें चण्डमहाकाल्यै नमः ॥१०३॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें सृष्ट्यै नमः ॥१०४॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें शिवङ्कर्यै नमः ॥१०५॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें नित्यायैनमः ॥१०६॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें परञ्ज्योत्यै नमः ॥१०७॥

ॐ फ्रें ह्रीं छ्रीं हूं स्त्रीं फ्रें परङ्गुह्यगुह्यकाल्यै नमः ॥१०८॥

॥ श्रीगुह्यकालीदेव्या:अष्टोत्तशतनामावलिः सम्पूर्णा ॥

८

॥ श्रीगुह्यकालीशतनामस्तोत्रम् ॥

शिव उवाच ॥

अतः काल्यां स्तवं वक्ष्ये शृणुष्व कमलानने ।
यत् प्रसादान्महात्मानः सर्वसिद्धिमवाप्नुयुः ॥
ॐ काल्यानीना महातेजा लोकधात्री महायशा ।
सरस्वती महालक्ष्मीः प्रजाश्रीबुद्धिवर्द्धिनी ॥१॥
धृतिदा पुष्टिदा स्वाहा कालीं कामकालीरूपिणी ।
सर्वसत्वहितेयुक्ता संग्रामेतारिणी जया ॥२॥
इन्द्रुती शङ्खिनी पुर्णा विद्याराज्ञी प्रियप्रदा ।
चन्द्रानना महागौरी कूजिता पीतवासवा ॥३॥
महामाया महालोका महाबलपराक्रमा ।
महारौद्री महाचण्डा दुष्टदानवघातिनी ॥४॥
प्रशान्ता शान्तरूपा च विजया च बलप्रदा ।
विद्युन्माली गदी खड्गी चक्री चापोदातायुधा ॥५॥
जृम्भिनी स्तम्भिनी बाला कालरात्री निशाचरी ।
यक्षिणी मोहिनी कृष्णा प्रशान्ता शान्तरूपिणी ॥६॥
ब्रह्माणी वेदमाता च तुहिनाचलवासिनी ।
मङ्गला शाङ्करी सौम्या जातवेदा मनोभवा ॥७॥
करालिनी महावेगा साध्या सत्यपराक्रमा ।
कान्तरी द्रविणी रक्ता नष्टसत्वविनाशिनी ॥८॥

वरदा शशिनी शास्त्रस्वरूपा त्रिविक्रमा ।
शबरी योगिनी सिद्धा चाण्डाली चामृता ध्रुवा ॥९॥
पूण्या धन्या महाप्रीतिः प्रीतिदा प्रेमविह्वला ।
कृतान्तवासिनी भीमा उग्रा उग्रमहातपा ॥१०॥
जगदेकहितायुक्ता शरण्या भक्तवत्सला ।
वागीश्वरी शिवा सूक्ष्मा शर्वा नित्या नगात्मजा ॥११॥
सर्वार्थसाधनी भद्रा गोष्ठी धात्री धनप्रदा ।
अभया गौतमी श्रेष्ठा निशीथे च श्रीः सर्वार्थकामुगा ॥१२॥
तारानामगुणा सर्वा सर्वाशा परिपूजिता ।
अष्टोत्तरशतं नाम कीर्तितं हितकाम्यया ॥१३॥
रहस्यमद्भुतं गुह्यं देवानामपि दुर्लभम् ।
प्रातःकाले निशीथे च रात्रौ वा परमेश्वरी ॥१४॥
यः पठेत् पाठयेद्वापि षण्मासं प्रत्यहं प्रिये ।
तस्य सर्वार्हसिद्धिः स्यात् यद्यन्मनसिवर्तते ॥१५॥
अष्टोत्तरशतं नाम कीर्तनं हितकाम्यया ।
सौभग्यकरणं जन्तोः सर्वपापविनाशनम् ॥१६॥
सर्वव्याधिप्रशमनं सर्वकाले सुखावहम् ।
त्रिकालं यः पठेद्धीमान् शुचिर्भूत्वा समाहितः ॥१७॥
सोःअचिरेऽनैव कालेन राज्यश्रियमवाप्नुयात् ।
दुःखितोऽपि सुखी नित्यं दरिद्रो धनवान् भवेत् ॥१८॥
यतो भवेत् महाप्राज्ञो मेधावी नात्र संशयः ।
बन्धनान्मुच्यते वद्धो व्यावहारे जयी भवेत् ॥१९॥
स एव दासतां यान्ति भृङ्गिगणश्चापि दंस्ट्रीणः ।
संग्रामे सङ्कटे दुर्गे नाभयं स्यात् समङ्गले ॥२०॥

स्मृत्वैतानि च नामानि सर्वपापं व्यपोहति ।
यस्त्विमां प्रातरुत्थाय मानवः कीर्तियिष्यति ॥२१॥
स दीर्घायुरायुष्मान् स श्रिया च न मुच्यते ।
देवा यक्षास्तथा नागा गन्धर्व्याः कटपूतना ॥२२॥

॥ श्रीरूद्रयामलेविश्वसारतन्त्रे गुह्यकालीशतनामस्तोत्रम्सम्पूर्णम् ॥

९

॥ श्रीगुह्यकालीलघुसहस्रनामस्तोत्रम् ॥

महाकालोवाच ॥

चण्डयोगेश्वरी चण्डी चण्डकापालिनी शिवा ।
चामुण्डा चण्डिका सिद्धिकराली मुण्डमालिनी ॥१॥
कालचक्रेश्वरी फेरुहस्ता घोराट्टहासिनी ।
डामरी चर्चिका सिद्धिविकराली भगप्रिया ॥२॥
उल्कामुखी ऋक्षकर्णी बलप्रमथिनी परा ।
महामाया योगनिद्रा त्रैलोक्यजननीश्वरी ॥३॥
कात्यायनी घोररूपा जयन्ती सर्वमङ्गला ।
कामातुरा मदोन्मत्ता देवदेवीवरप्रदा ॥४॥
मातङ्गी कुब्जिका रौद्री रुद्राणी जगदम्बिका ।
चिदानन्दमयी मेधा ब्रह्मरूपा जगन्मयी ॥५॥
संहारिणी वेदमाता सिद्धिदात्री बलाहका ।
वारुणी जगतामाद्या कलातीता चिदात्मिका ॥६॥
नाभान्येतानि पठता सर्वं तत् परिपठ्यते ॥७॥

॥ श्रीगुह्यकालीलघुसहस्रनामस्तोत्रं सम्पूर्णम् ॥

१०

॥ श्रीगुह्यकालीसहस्रनामस्तोत्रम् ॥

श्रीसदाशिव उवाच ॥

ॐ नमस्त्रिभुवनेशाय ब्रह्मणे विश्वरूपिणे ।
ईश्वराय परेशाय गुरवे शिवरूपिणे ॥१॥
यस्याः प्रसादाद्देवोऽपि सर्वज्ञः सशिवो भवेत् ।
तां नौमि परमेशानी सर्वव्यापिनीमीश्वरीम् ॥२॥
ब्रह्माण्ड कोटिलक्षाणि भस्मसात् कुरुते यया ।
तां कालग्रासनिरतां गुह्यकालीं नमाम्यहं ॥३॥
यया सर्वं वितनुते यां विशन्ति पुनः पुनः ।
यस्यार्च्चनेन देवोऽपि शिवः सर्वज्ञ योगवित् ॥४॥
सृष्टिस्थित्यन्तकर्त्ता च सो भवत्परमेश्वरः ।
शिवं च शान्तमीशानजरामरण वर्जितम् ॥५॥
पुरायुगादौ रौद्रेण शक्त्यासंधारयेद्गुणैः ।
प्राप्तवान् परमं ज्ञानं स्तवराजं महामनुम् ॥६॥
शिवेन विष्णवे दत्तं विष्णुना ब्रह्मणे ददौ ।
ब्रह्मणा च वशिष्ठाय वशिष्ठो मनवे ददौ ॥७॥
मनुनाराज्यकामेन सदाजप्तैकमानसः ।
पयोधि मेखलां पृथ्वीं सशासमनुरेकराट् ॥८॥
विनाव्रतैर्विनाध्यानैर्विनापूजाजपैस्तवैः ।
वीरसाधनहोमादि विनाशीघ्रं फलप्रदा ॥९॥

नानेन सदृशं स्तोत्रं विद्यते भुवनोदरे ।
तस्मात्सर्वं परित्यज्य पठेन्नामसहस्रकम् ॥१०॥
यस्या नाम सहस्रस्य पंठनान्न पुनर्जनिः ।
तस्मात् सर्वप्रयत्नेन पठनीयं समाहितः ॥११॥
एकाग्रमतिख्यग्रं कृत्वा ध्यायेन् महेश्वरीं ॥१२॥

ॐ अस्यश्रीगुह्यकालीमंत्रनामसहस्रस्य श्रीसदाशिवऋषिरनुष्टुप्छंदः श्रीगुह्यकालीदेवता ॐ बीजं फ्रें शक्तिः ह्रीं कीलकं सर्वेष्टसिद्ध्येविनियोगः ॥

॥ ध्यानम् ॥

ब्रह्मादिपंचकयुगश्रुतिदिक्पतिनां मुण्डेषुभैरवशिवाप्रलयानलेषु तस्योर्द्ध्वके दशशरच्छदविद्रुमाभेपद्मे स्थितां भगवतीं परमादशास्याम् ।

सिंहेभकोलकपिऋक्षतुरंगतार्क्ष योगेश्वरीमकरमानवपंक्तिवक्त्रां शूलां कुशापरशुमुद्गरपाशपात्रखट्वांग बालकशिरोङ्कितपाणिपद्माम् ॥१३॥

ॐ ह्रीँ फ्रैँ छ्रीँ हूँ स्त्रीँ नमः ॥
ॐ गुह्यकाली महाकाली भद्रकाली सुमंगला ।
परापरेश्वरी धूम्रा परमेष्ठीवरप्रदा ॥१४॥
चंडिका चर्च्चिका दुर्गा चामुण्डाशववाहिनी ।
चण्डघण्टा चण्डहासा चण्डबेतालवाहिनी ॥१५॥
चारुप्रसन्नवदना चण्डमुण्डविनाशिनी ।
चण्डघोषमहारावा चारुचक्रप्रकाशिनी ॥१६॥
चण्डेश्वरप्राणचरी चण्डफेरवराशिनी ।
प्रचण्डदैत्यदर्प्पघ्नी समस्तपातकापहा ॥१७॥
भद्रा भद्रेश्वरी भीमा भीषणी भैरवप्रिया ।
महाभाग्यप्रदा भाग्या भवबन्धविमोचिनी ॥१८॥
भवानी भवरोगघ्नी भक्तभावप्रबोधिनी ।
महामोहप्रशमनी महोत्साहप्रसादिनी ॥१९॥

क्षमा कान्ति प्रभा ज्योत्स्ना चण्डयोगेश्वरि शिवा ।
तेजरूपा तेजमया दिव्यतेजप्रकाशिनि ॥२०॥
ज्योतिर्वक्त्रा महाचण्डयोगेश्वरी महाप्रभा ।
सिंहवक्त्रा शिवावक्त्रा कपिवक्त्रा गजानना ॥२१॥
तार्क्ष्यवक्त्रा शंकुवक्त्रा ऋक्षवक्त्रा हयानना ।
नरवक्त्रा नीलवर्णा चतुःपंचाशदोर्युता ॥२२॥
चिद्रत्नमुद्रिका हस्ता नरमुण्डविभूषिता ।
शुष्कमुण्डविभूषा च नानारत्नविभूषिता ॥२३॥
दुष्टप्रशमनी रौद्रि बालिका सिंहवाहिनी ।
नरमुण्डविभूषा च शुष्कमुण्डविभूषिता ॥२४॥
कालकाली दीप्तकाली प्रधाना बलिभक्षणी ।
जयाजयन्ती विजया जयदुःस्वप्ननाशिनी ॥२५॥
ब्रह्मप्रेतासना चारु कमला कमलप्रिया ।
दीप्तजिह्वा ललजिह्वा विद्युज्जिह्वा जरापहा ॥२६॥
चंद्रार्कवह्निनयना विष्णुप्रेतासनस्थिता ।
सूर्यमण्डलमध्यस्था नानाकर्मफलप्रदा ॥२७॥
रुद्राप्रेतासना रौद्री कामिनी पद्मलोचना ।
ईश्वरासनसंस्थाना ईश्वरीश्वरवल्लभा ॥२८॥
महाप्रभावा महती महदैश्वर्य दायिनी ।
सदाशिवासना रामा देवमाता सुधा स्मृता ॥२९॥
क्रोष्टरावस्थिता माया महामृतमहास्मृतिः ।
महाफेरवी रामा रावरौद्रा भयंकरी ॥३०॥
महासेनस्यजननी प्रतिष्ठा पालिनी शुभा ।
निशुम्भशुम्भदलनी मधुकैटभनाशिनी ॥३१॥
दुर्धर्षदमनी कन्या विडालाक्षप्रमर्दिनी ।

रक्तबीजविशोषघ्नी महिषासुरघातिनी ॥३२॥
उग्रचण्डा उग्ररूपा उग्रशत्रुनिपातिनी ।
उग्रपापक्षयकरी उग्रशासनशासिनी ॥३३॥
उग्रायुधधरी धात्री उग्रभूषणभूषिता ।
महापापप्रशमनी उग्रकर्मकरी किला ॥३४॥
रुद्रचण्डा प्रचण्डा च चण्डेग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी प्रचण्डा चण्डनादिनी ॥३५॥
योगिनी च महाचण्डा चण्डरूपातिचण्डिका ।
खड्गिनी शूलिनी घोरा हुंकारा रावनादिनी ॥३६॥
पाशिनी शक्तिनी चण्डी महाकन्दलधारिणी ।
खट्वांगिनी मुण्डिनी च चापिनी चक्रिणी परा ॥३७॥
घण्टारावप्रिया नित्या शैलिनी कुट्टिनी महा ।
बालप्रेतधृतवती महाक कङ्कालधारिणी ॥३८॥
नकुलिनी च सर्पास्त्रधारिणी वशिनी उमा ।
षडस्र ओडिकाहस्ता वह्निपात्र त्रिदण्डिनी ॥३९॥
श्रुचहस्ता च सिंही च वज्रमुद्गरधारिणी ।
हुंकारिणी डिण्डिमी च श्रीकरी कर्त्रीधारिणी ॥४०॥
महाङ्कुशधृतवती महाडिण्डिमनादिनी ।
त्रिशूलिनी दण्डिनी च धनुः कलशधारिणी ॥४१॥
पद्माकुशपुस्तकञ्च धारिणी प्रेतवाहिनी ।
छुरिका तोमरवती महाकुसुममालिनी ॥४२॥
नद्यावर्त्तधृतवती परमानन्ददायिनी ।
पारमेशी महारौद्री भक्तवश्या भवप्रिया ॥४३॥
व्योमवामेश्वरी वामा खेचरी दिक्चरी धृती ।
गोचरी भूचरी सौम्या पतंगी पालकी शिवा ॥४४॥

नरविल्लवराहा गोसर्पास्या विविधानना ।
शुद्धमूर्तिः शीलमुर्तिः सूर्यमुर्तिर्गुणाश्रया ॥४५॥
सोममूर्तिर्महानंदा प्रभामूर्तिर्महानभाः ।
क्षीरमूर्तिर्महार्चिष्मा महाकेतुकुलीशिका ॥४६॥
पताकिनी दयारम्भा मूलप्रकृतिरीश्वरी ।
मार्तण्डमण्डलचरी सिंदूरतिलकप्रिया ॥४७॥
ऋक्षसाहस्रमूर्तिश्च चण्डमूर्तिमहिश्वरी ।
महाहंसमती विष्णुमती विमलसिंहिका ॥४८॥
महाखण्डमती सिंहमती वीरमती प्रभा ।
अहिशमती मातङ्गी क्षतक्षरमहामतिः ॥४९॥
विचित्रचित्रितमती वीरसिंहनती परा ।
भैरसिंहमती ज्ञानमहारश्मिमती कृशा ॥५०॥
महाकोङ्कणसंस्थानी महाईडामरीचिका ।
सर्वगाम्बा दिव्यगाम्बा महामीना महासुरी ॥५१॥
महाचण्डी च दिव्याङ्गी महाविद्याप्रपूजिता ।
महान्तरिक्षतेजाम्बा सिद्धियोगिनी भामिनी ॥५२॥
गगणाम्बा महाभट्टि महालम्बगुणीकृशा ।
महाचण्डी मण्डलाम्बा शौनकी झषणी घनी ॥५३॥
पटुकिनी च पटुकी गन्धकाली मतङ्गीणी ।
कैवर्तिनी पञ्चका च मत्तकामिनी राक्षसी ॥५४॥
भनकी भक्षकी श्रोत्रि धूम्रा दंष्ट्रिणी रूपिका ।
ज्वालिनि गगनेशी च भावा गांधारिणी नदी ॥५५॥
बिम्बा शान्ता महामाया सुभङ्ग्या नन्दिनी ध्रुवा ।
उमानन्दा श्रियानन्दा महानन्दा सुनन्दिनी ॥५६॥
इडा मरीचि विविधाम्बा मीनजाम्बा प्रबोधिनी ।

चण्डिनी रौद्रिणी दिव्या सिद्ध्यन्तरीक्षगा स्मृता ॥५७॥
अम्बिका बालिकाम्बा च साक्षात्साधुजनार्चिता ।
विद्याधरी चण्डिनी च मारुता सर्वदास्मृता ॥५८॥
उल्कामुखी लोकमुखी चण्डेशी चण्डमालिका ।
भीमानना अनङ्गाख्या विद्याकारप्रवर्तिनी ॥५९॥
दुन्मनी सुन्दरी स्वाहा सुधामण्डलचारिणी ।
कराला विकराला च खगास्या खगवाहिनी ॥६०॥
शृगालि पूतना वज्रव्योमकाली च कौलिकी ।
योनिश्च सिद्धियोनिश्च महायोनिः सुयोनिजा ॥६१॥
सिद्धयोनिः शङ्खयोनिः महाशङ्खास्थियोनि च ।
दिव्ययोनिर्महादिव्ययोनि पद्माक्षयोनिका ॥६२॥
महाभक्षणभक्षी च महासंहारिणी शिरा ।
महारक्तेश्वरी रौद्री महाकृतान्तनाशिनि ॥६३॥
महायमभक्षणी च कालसंहारघोषिणी ।
कालरात्रीर्महारौद्री चण्डालि कालनाशिनी ॥६४॥
वीरेश्वरी वीरपूज्या कालाग्निभयदारिणी ।
महाभैरवसंहारी ब्रह्माण्डानर्विहारिणी ॥६५॥
संहारकालिका भद्रा महाभयविघातिनी ।
सृष्टिकाली महादिव्या स्थितिकाली महोज्वला ॥६६॥
संहारकालि कोडामा कालग्रसनकालिका ।
रक्तकाली महोग्रा च काली यमसमार्गिका ॥६७॥
मृत्युकाली भद्रकाली महामार्तण्डकालिका ।
महाकालाग्निकाली च परमार्कार्ककालिका ॥६८॥
कालकालि महाघोरा चण्डभैरवकालिका ।
मंत्रकाली हंसकाली क्रमकाली च डामरी ॥६९॥

ज्ञानकाली चक्रकाली चक्र ओङ्कारकालिका ।
महागगनकाली च एकभासा च कालिका ॥७०॥
महाशब्दकालिका च महाबलात्तकालिका ।
ऋद्धिकाली सिद्धिकालि भासा श्रीहंसकालिका ॥७१॥
चण्डभासाकालिका च भासा डामरकालिका ।
भासायोगी महाभासा भासा गगनकालिका ॥७२॥
भासाम्बरकालिका च भासा अक्षस्तुकालिका ।
सूर्यकाली चंद्रकाली अग्निकाली सुभीषणा ॥७३॥
वायुकाली व्योमकाली मनःकाली सुव्यापिनि ।
सर्वकाली सिद्धिकालि निरालम्बास्तुकालिका ॥७४॥
कालिका दंष्ट्रिणीमुद्रा मुद्रा सा लेलिहानका ।
कपालमुद्रा कालघ्नीमुद्रा सा कालनाशिनी ॥७५॥
समयघ्नी घोरमुद्रा विकराला च डामरी ।
श्रीकुण्डला ज्ञानमुद्रा शिराकपालमुद्रिका ॥७६॥
योनिमुद्रा परामुद्रा महामुद्रा च द्वादशी ।
छिप्पिणी धीवरी काली पुलिन्दी ओडिका प्रभा ॥७७॥
वेश्याम्बा शौण्डिनी घोरा कैवर्त्ती खटकी मती ।
रजकी छिप्पिणी ज्ञाना अटकी कोशध्यम्बिका ॥७८॥
अग्निवक्त्रा च पिंगाक्षी रमणी वमनी जरा ।
गोकर्णी गजकर्णी च चामुण्डा अश्वकर्णिका ॥७९॥
विद्युन्मुखी प्रसन्नाम्बा लोकमाता प्रभाविनी ।
ब्रह्मानना ब्रह्मवला कपिला पूतनाभया ॥८०॥
भग्ननाशा भग्नकर्णा सघृष्टा राजमातृका ।
गुह्येश्वरी शारदा च जल्पेश्वरी च पार्वती ॥८१॥
कुलाली हरिणी माया महामाया च अम्बिका ।

रक्ताम्बा च महाभाली घण्टाली चित्रिणी स्मृता ॥८२॥
ऊर्ध्वकेशी छिन्नमस्ता महालक्ष्मी त्रिकोणगा ।
मातंगी शिवदूती च सिद्धाम्बा पद्ममंदिरा ॥८३॥
पद्मयोनिर्निरावाधा सुलिङ्गा भगमालिनी ।
चण्डाख्या त्रिजटा ध्याना त्रिशक्तिमातृकातरा ॥८४॥
कपालिनि मालिनी च कामिनी कामलालसा ।
मंत्रेश्वरी उग्रकालि लक्ष्मीमाली तु मालिका ॥८५॥
कुलाली रक्तचण्डाख्या कामलक्ष्मी मनोभवा ।
जिनमाता जिनेन्द्रा च शारदा हंसवाहिनी ॥८६॥
महाग्रीवा च सुरमा सुभक्ता च मनोहरा ।
अश्वराम्बा पराम्बा च नगशैलाग्रवासिनी ॥८७॥
शुष्ककंदलभूषांगी शुष्ककंदलधारिणी ।
दंष्ट्रिनी विकटास्या च शिवदूती धनस्तनी ॥८८॥
सर्पमालाविभूषांगी सर्पकुण्डलधारिणी ।
सद्यछिन्नशिरोमाला आपादान्तावलम्बिनी ॥८९॥
बहुवक्त्रा बहुभुजा बहुपादा गणेश्वरी ।
त्रिकोणबिन्दुनिलया पंचक्रमनिवासिनी ॥९०॥
स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्माग्रा बुद्धिबोधिनी ।
मूलाधारनिरधार वह्निकुण्डकृतालया ॥९१॥
श्वासोच्छ्वासगतज्जिवाग्राहिणी वह्निसंश्रया ।
वल्लतन्तुसमुत्थाना षडुशा स्वादुलोलुपा ॥९२॥
कालचक्रभ्रमिर्भ्रान्ता निभ्रमा भ्रमनाशिनी ।
वात्याली मेघमालि च सुवृष्टिः शस्यवर्धिनी ॥९३॥
अकारा च वकारा च उकारैकाररूपिणी ।
ह्रीङ्कारबीजरूपा च क्लीङ्काराम्बरवासिनी ॥९४॥

सिन्दूरारूणवर्णा च सिन्दूरतिलकप्रिया ।
श्यामा च वश्यबीजा च लोकवश्यविभाविनी ॥९५॥
गजानना हयमुखा रासभास्या शुकानना ।
चर्चिका वनचारिण्यै परमंत्रविदारिणी ॥९६॥
सहस्रास्या सहस्रक्षा सहस्रभुजधारिणी ।
सहस्रपदचारिण्यै प्रेतमार्गप्रबोधिनि ॥९७॥
कोटिवक्त्रा कोटिपादा भुजाकोटिधृता सदा ।
महामारि विनिन्द्रा च तन्द्रा मृत्युविनाशिनि ॥९८॥
चन्द्रमण्डलसंकाशा चन्द्रमण्डलवासिनी ।
अणिमादिगुणोपेता अस्पृहा कामरूपिणी ॥९९॥
अष्टसिद्धि प्रजासोता दुष्टदानवघातिनि ।
अनादिनी धना पुष्टिश्चतुर्वर्गफलप्रदा ॥१००॥
गिरिकर्णी प्रतिकाशा सरत्कुमुद लोचना ।
भूतभव्यभविष्यज्ञा भूतभावनभाविनी ॥१०१॥
वाममार्गरता वामा शिववामाङ्गवासिनी ।
मंगला च सुशीला च प्रेतमार्गप्रबोधिनि ॥१०२॥
कुब्जिका च कुजा कुब्जा माता मालिनी मानदा ।
ज्वालामुखी वेगवती उमा शुष्का महेश्वरी ॥१०३॥
शुभा कामा च प्रकृतिर्घोषिणी रावराविणी ।
क्रममण्डलमध्यस्था क्रमेशी च नवात्मिका ॥१०४॥
ब्रह्मी रौद्री गुहवती वैष्णवी घोररूपिणी । ना
रसिंही शक्रवती चामुण्डा चर्चिता भगा ॥१०५॥
भगास्या भगिनी भव्या महाभाग्या महाबला ।
योगिनी रागिणी रम्या रत्नकञ्चुकधारिणी ॥१०६॥
गजचर्मवृताङ्गी च व्याघ्रचर्मकटिस्तथा ।

सिंहचर्मनितम्बी च कालचर्मोत्तरीयका ॥१०७॥
विश्वलक्ष्मीर्विश्वमाता जातरूपस्वरूपिणी ।
सर्वमंत्रमयी विद्या सर्वमंत्राक्षरा वरा ॥१०८॥
मातृमण्डलमध्यस्था मातृमण्डलवासिनी ।
कुमारजननी शुद्धा सुमुखी पापनाशिनी ॥१०९॥
मानलक्ष्मीश्च सुभगा शीतला शीलसंयुता ।
दिव्यास्तम्प्रदाकाली च पातालस्फोटकालिका ॥११०॥
मृत्युध्वजा वातध्वजा यमध्वजनी तारिणी ।
अपराजिता अजिता रामणी रामनाशिका ॥१११॥
शुष्का शुष्कमुखीधामा विकरालि करालिनी ।
राममाता रामपूज्या राज्यदाराज्यपूजिता ॥११२॥
शिवामहंत्तारिका च विशाखा नृहरिप्रभा ।
मनोनुगा कौलीनी च विश्वेशी पाशतारिणी ॥११३॥
रक्ता रक्तप्रियाऽघोरा कराला केकराघना ।
कर्णमोटि च योगेशी मीनस्थाननिवासिनी ॥११४॥
कलंकमालिनी कान्ता नारायणी जगद्धिता ।
अट्टाट्टहासिनी हासा वज्रपुष्पालिमालिनी ॥११५॥
यंत्रप्रमथनी मंत्रमाता मंत्रप्रकाशिनी ।
रुरुदेवी ललजिह्वा धामात्ता शवरी गवी ॥११६॥
मरीचिकाली कालघ्नी कालचर्मविभूषणी ।
श्मशानकालिका धूम्रकाली विश्वविमर्दनि ॥११७॥
संग्रामकालिका कालवंचनी रावनादिनि ।
ज्वालाननी कराली च धूम्रकालि रणप्रिया ॥११८॥
अमरान्तरकाली च चण्डी भुवनपालिनी ।
कुलिकान्तरकाली च माहेशी कृष्णपिंगला ॥११९॥

पातालिनी पापहरा पातालस्फोटिनी शिवा ।
रावराविणी रौद्रस्या गर्भस्तंभनकालिका ॥१२०॥
अक्षवक्त्रा चण्डयोगेश्वरी प्रत्यंगिरा स्मृता ।
मृडानी च स्वधा स्वाहा धूम्रा गंगामहोद्धृता ॥१२१॥
आदेशकालिका क्षोभकाली मेलापकालिका ।
आकर्षकालि आकर्षी शान्तिनी नेभ्रकालिका ॥१२२॥
वरप्रदा महाकाली नेत्रकाली सुराश्रिता ।
भक्तावेश्या भक्तसेवा कमलालय वासिनी ॥१२३॥
पंचप्राणेश्वरी प्राणरक्षिणी रक्तचण्डिका ।
शाकम्भरी विडालाक्षी नन्दा भद्राऽजिताऽनघा ॥१२४॥
मनोन्मनी महादंष्ट्रा करवीरनिवासिनी ।
करवीरश्मशानस्था लक्ष्मीर्वनगुहाचरी ॥१२५॥
चण्डासुरनिहन्त्री च चन्द्रा सुचन्द्रधारिणी ।
ब्रह्मकङ्कालसंलग्ना विष्णुकङ्कालभूषिता ॥१२६॥
महामन्त्रकालिका च महाभीषणकालिका ।
कुन्दुपुष्पप्रिया श्यामा गोलकं कुसुमप्रिया ॥१२७॥
स्वयम्भुकुसुमानन्दा दूतीषट्क समाग्रणीः ।
वेश्या च शौण्डिनी ब्राह्मी खेटकी छिप्पिलि कुली ॥१२८॥
रजकी बालकी बालधाम्नि धाम्ना धमप्रदा ।
कैवर्ती भट्टकी कौली बालिनी क्षत्रिनन्दिनी ॥१२९॥
चक्रिणी पौक्कसी शूद्री धीवरी चर्मकारिणी ।
मातङ्गी नरकी वेश्या वायकी श्वानकी सरी ॥१३०॥
चाण्डालध्वजिनी वेश्या महामत्यन्तजा शुकी ।
महाक्रमणकाली च कालकाली च कालिका ॥१३१॥
महागगनकालि च एकभासा च कालिका ।

मनतीकालिकारूप काली कनककालिका ॥१३२॥
शब्दकाली महाकाली कालिका ब्रह्मकालिका ।
स्वर्णकोटिश्वरी काली राजराजेश्वरी स्मृता ॥१३३॥
महाडामरकाली च भासाकाली च योगीनी ।
गुह्येश्वरी महाकाली महाशूलाग्रकालिका ॥१३४॥
योगिनी कालिका देवी वनदुर्गा वनप्रिया ।
मातङ्गी मदिरामत्ता नरमांसरता सदा ॥१३५॥
शबरी शाबरी शैला शरणागततत्परा ।
वत्सला वारुणी देवी माहेशी मत्तगामिनी ॥१३६॥
ऊर्ध्वकेशी च कालाख्या चक्रेशिनी मर्दिनी ।
आद्यकाली च फेत्काली काली श्रीहिंसिका तथा ॥१३७॥
धर्मकाली ज्ञानकाली राविणी कालिका परा ।
लीलावती कालिका च ह्रींमती कालिका ततः ॥१३८॥
छुरिका कालिका प्राणा हुंकारा रावकालिका ।
महाफेरवकाली च महाकालालिकालिका ॥१३९॥
नादिनीकाली कामाक्षा स्वामिनी कामकालिका ।
हासिनीकालिका हीलीकाली भुवनमोहिनि ॥१४०॥
सृष्टिकाली स्थितिकाली संहारकालिका कला ।
हंसकाली यमकाली कालग्रासनकालिका ॥१४१॥
विघ्नान्तकारिणीकाली वृषभध्वजकालिका ।
कुक्कुटध्वजकालि च गरुडध्वजकालिका ॥१४२॥
मयूरवाहिनी कालि हंसध्वजनिवासिनी ।
कालरात्रिर्महाकालि चण्डचण्डेश्वरी स्मृती ॥१४३॥
कुलालिका कुलेशी च महानन्दनचारिणी ।
विंध्यवासिन्यपर्णेशी वीरालीपरिपूजिता ॥१४४॥

वीरेश्वरीकालिका च महाकृतान्तकालिका ।
रक्तरक्तेश्वरीकाली कालाग्निकालिका परा ॥१४५॥
फेत्कारिणी क्रोष्टुकी च रामा ईश्वरवल्लभा ।
अपर्णा त्रिपुरा तारा उग्रतारा कलंकिनी ॥१४६॥
वार्तालिका च वाराही वराहवदनो घना ।
अन्धिनी रुन्धिनी काली स्तंभिनी मोहिनीकरा ॥१४७॥
जम्भिनी जयदा जैत्री जगद्वन्द्या जगत्प्रसू ।
डाकिनी राकिनी काली लाकिनि शाकिनि गणा ॥१४८॥
काकिनी हाकिनि शीला याकिनी धातुवासिनी ।
अणिमा लघिमा शान्तिर्महिमा महदाश्रिता ॥१४९॥
ईशत्वकाली वासित्वा शाबरी सारगामिनी ।
कंकालतोरणवती महापितृवनेश्वरी ॥१५०॥
श्मशानवासिनी रौद्री घोराघोरातनुः श्रिता ।
सृष्टिस्थित्यन्तसंहारकारिणि विश्वधारिणी ॥१५१॥
त्रिमार्गागतिसञ्चारी ब्रह्मरन्ध्रनिवासिनी ।
षट्चक्रभेदिनी गुह्या भक्तमानसवासिनी ॥१५२॥
जनी जनित्री जननी जयमातृगणेश्वरी ।
ब्रह्मविद्या ब्रह्मवेद्या ब्रह्माण्डकोटिव्यापिनी ॥१५३॥
वामाचाररता वामा नग्ना दक्षिणकालिका ।
झंकारिणी रामवशी टंकारी विबुधेश्वरी ॥१५४॥
मुक्तकेशी विरुपाक्षी जगदानन्ददायिनी ।
झंकेश्वरी च झंकारा चक्रमार्गानुसारिणी ॥१५५॥
सहस्रकोटिसूर्यानान्तेजसा तेजनाशिनी ।
सहस्रकोटिसोमानाममृतश्रावणी प्रदा ॥१५६॥
गुह्याख्या योगिनी पूज्या सदामृतामृतप्रदा ।

सप्तविंशतिमुण्डस्था त्रिमुखा नवलोचना ॥१५७॥
सरस्वती च गायत्री सावित्री मङ्गलेश्वरी ।
वाग्वादिनी क्लेशहरी कर्मबन्धविमोचिनी ॥१५८॥
वर्णेश्वरी वर्णमयी वर्णमाला विराजिता ।
त्रिलोकजननी गोप्त्री मान्या गगनगामिनी ॥१५९॥
पंचभूतप्रिया नित्यापंचपिण्डैः प्रपूजिता ।
शब्दरूपिणीआकाशे प्रकाशेतेजरूपिणी ॥१६०॥
गन्धरूपिणी भूम्यान्तु पवनेस्पर्शरूपिणी ।
रसरूपिणीतोयेषु पञ्चभूतस्वरूपिणी ॥१६१॥
सुरभीरूपिणीपुष्पे दुग्धेसर्पिःस्वरूपिणी ।
परब्रह्मात्मिका काली जयद्रथवरप्रदा ॥१६२॥
दुर्वासासिद्धिदात्री च राक्षसी क्षोभिणी तथा ।
जयवागेश्वरी ह्रीँश्रीँ विद्या च त्रिपुराश्रिता ॥१६३॥
त्रिपुरा भैरवी ज्ञाना कालिका लयभैरवी ।
चैतन्यभैरवी देवी चण्डभैरवी सिंहिका ॥१६४॥
संपत्प्रदाभैरवी च मार्गभैरवी मार्गिणी ।
जयश्रीभैरवी काली मनोन्मादनभैरवी ॥१६५॥
हरसिद्धिः प्रपन्नार्तिहारिणी दानवान्तकी ।
पूर्णेश्वरी पूर्णमना पूर्वदेवप्रपूजिता ॥१६६॥
पूर्णपात्ररता नित्या सदाचारविचारिणी ।
पूर्णवांछितदात्रि च सद्सद्वांछिताग्रणीः ॥१६७॥
कालिका लयकाली च सर्वज्ञानप्रदाऽनघा ।
योगेश्वरी महाचण्ड महोद्दाम महोग्रणी ॥१६८॥
सृष्टिस्थितिश्च संहार अनाख्या भासाकालिकाः ।
गुह्यकाली विश्वमाता निर्वाणेशी परेश्वरी ॥१६९॥

इतिश्रीपरमेशान्यां स्तोत्रं नामसहस्रकम् ।
स्मृत्वा मंत्रोपनिषदं महापातकनाशनम् ॥१७०॥
महामंत्रोपदिष्टाही विश्वेशी विश्वरूपिणी ।
दोषानां राशयो घोरा मेरुमन्दरसन्निभा ॥१७१॥
प्रदहन्ते तेन क्षिप्रमिन्धनानि यथाग्निना ।
स्नानेन कोटि तीर्थाणां मंत्रकोटिजपादिभिः ॥१७२॥
धेनूनां कोटिदानेन विप्राणां कोटिभोजनैः ।
कोटिधा कोटिहोमेन तपसाजन्मकोटिषु ॥१७३॥
महीङ्कांचनसंपूर्णं सप्तद्वीपाद्रिसागराम् ।
दत्वा चराचरान्सर्वान् यत्फलं लभते ध्रुवम् ॥१७४॥
तत्फलं लभते साङ्गं स्तवानाङ्कीर्तनाध्रुवम् ।
अष्टम्यां वा नवम्यां वा भूतायां वारवेर्दिने ॥१७५॥
कुजेवाथ शनौवाथ पठितव्यं गुरौपि वा ।
एकाग्रं चिन्तयेद्देवीं धूपालिपरिमोदिते ॥१७६॥
पुष्पप्रकारसंकीर्णे बलिदानपुरस्कृते ।
साद्रेणपूजयेद्देवीं शुष्कास्येन न चिन्तयेत् ॥१७८॥
जन्मकोटिसहस्रेण यत्पापं समुपार्जितम् ।
अनेनवृतमात्रेण वांछितार्थं लभेध्रुवम् ॥१७९॥
आयुरारोग्यमाप्नोति धर्मकामार्थसंततिम् ।
इष्टान्कामानवाप्नोति त्रिरावृत्यान संशय ॥१८०॥
चंद्रसूर्योपरागे वा नवम्यां शारदोत्सवे ।
सर्वसिद्धिं लभेल्लुपं पुण्यात् वासप्तं भूकुलम् ॥१८१॥
पीठोपपीठसंदोहतीर्थक्षेत्राश्रमादिकम् ।
अशेषा देवता सिद्धा गुहाःपर्वतकानना ॥१८२॥
तंत्रागमादिशास्त्राणि वेदाः पौराण साधका ।

सर्वे तत्रैव तिष्ठन्ति यत्रेदं स्तवनायकम् ॥१८३॥
पठेन्नाम सहस्रन्तु सर्वदोषनिवर्हणम् ।
सिंहिकाप्रेतकुष्माण्डापिशाचाभूतपूतना ॥१८४॥
क्रूरग्रहाश्च डाकिन्योः ये चान्ये दुष्टचेतसः ।
डाकिनी राक्षसा घोरा ये चान्ये पीडका जनाः ॥१८५॥
हिंसकाश्च विनश्यन्ति इत्याज्ञां शाङ्करी ध्रुवम् ।
सम्भवन्ति न ते तत्र यत्रेदं तिष्ठते गृहे ॥१८६॥
संग्रामे जयदं सद्यते तेषां शत्रुविनश्यति ।
आयुष्मान् धनवान् भूत्वा जायते सुभगः सुखी ॥१८७॥
नद्यामन्तर्जलेमग्ना भूतायां भौमवासरे ।
सप्तावर्त्तेन देवेशि तुष्टाभवति निश्चितम् ॥१८८॥
कन्यां संपूज्योपचारैस्तस्याग्रे पाठयेत् पठेत् ।
तुष्टा भवति सा देवी सर्वं भद्रमवाप्नुयात् ॥१८९॥
आपदुद्धारणन्नामघोरे कलियुगे महत् ।
स्तोतव्या च नमस्कार्या सर्वदेवमयी च सा ॥१९०॥
सैव पालयते विश्वं सैव विश्वं प्रसूयते ।
सैव संहरते काले सैव विश्व महीश्वरी ॥१९१॥
तुष्टा भवति सानेन किमलभ्य महीतले ।
राज्यं सौख्यं निराबाधा प्रेतमोक्षलभेध्रुवम् ॥१९२॥
यस्या ब्रह्माण्डमखिलं क्रीडार्थं कन्दुकायते ।
तां कालग्रास निरतां कालसंकर्षिणीं नमः ॥१९३॥
भक्षयन्त्या जगत्सर्वमतृप्ता कामरूपिणि ।
या शान्ताकारिणीं कालीं कालसंकर्षिणीं नमः ॥१९४॥
परब्रह्म स्वरूपा सा परतत्वानुविन्धिनी ।
जगद्ग्रासरतां नित्यां कालसंकर्षिणीं नमः ॥१९५॥

या समस्ताज्वलद्रूपा नानाकारामहोज्ज्वला ।
सा कालग्रासनिरतां कालसंकर्षिणीं नमः ॥१९६॥
लेलिह्यमानामत्यर्थभीषणा या सुभैरवी ।
महानृसिंहमारूढां कालसंकर्षिणीं नमः ॥१९७॥
अलात चक्रवद्विश्वं क्रीडार्थं भ्राम्यते यया ।
तां कालग्रासनिरतां कालसंकर्षिणीं नमः ॥१९८॥
ब्रह्माण्डकोटि लक्षाणि भस्मसात् कुरुते यया ।
तां कालग्रासनिरतां कालकालीं नमाम्यहम् ॥१९९॥
नौमि कालीं महद्रूपां प्रधानाबलिभक्षिणीम् ।
क्रीडार्थं या करो चित्रां ब्रह्माण्डार्म्बुदमालिनीम् ॥२००॥
अंजनाद्री निभां कालीं कोटिसूर्यसमप्रभाम् ।
त्रैलोक्यरक्षणरतां मंगलां प्रणमाम्यहं ॥२०१॥
गुह्यकालीं मंगलाञ्च सिद्धिकालीं जयेश्वरीम् ।
चर्चिकां त्रिपुरेशीञ्च कालिं च भुवनेश्वरीम् ॥२०२॥
श्रीमंगलां महाकालीं निर्वाणपददायिनीम् ।
मोक्षदां राज्यदां नित्यां दशवक्त्रां परां भजेत् ॥२०३॥

॥ श्रीहाहारावमहातंत्रे षत्रिंशत्साहस्रे महाथर्वणसंहितायां शिवपार्वतीसामरस्ये श्रीगुह्यकालीदेव्याःसहस्रनामस्तोत्रं सम्पूर्णम् ॥



११

॥ श्रीगुह्येश्वरीसहस्रनामस्तोत्रम् ॥

ॐ नमः श्रीगुरवे ॥

अगस्त्य उवाच ॥

कार्त्तिकेय त्वया प्रोक्ता गुह्येशी दक्षिणे तटे ।
वाग्वत्याः सरितः श्रीमन्नेपाले पीठसत्तमे ॥१॥
साम्प्रतं श्रोतुमिच्छामि तस्या नामसहस्रकम् ।
ब्रूहि देव महाभाग लोकानुग्रहकांक्षया ॥२॥

स्कन्द उवाच ॥

पुरा श्रुतं मया शम्भोः सकाशाद्द्विजसत्तम ।
तत्तेऽहं सम्प्रवक्ष्यामि सर्वपापहरं परम् ॥३॥
गुह्येश्वर्या महाभाग अष्टोत्तरसहस्रकम् ।
नाम्नां श्रवणमात्रेण गुह्येशी सुप्रसीदति ॥४॥

॥ विनियोगः ॥

ॐ अस्यश्रीगुह्येश्वरीसहस्रनामस्तोत्रमन्त्रस्य महादेव ऋषिरनुष्टुप्छन्दो । गुह्येशी देवता । ॐ बीजं । नमः कीलकं । गुहावासिनीशक्तिश्चतुर्व्वर्गसाधने विनियोगः ॥

॥मूलस्तोत्रम् ॥

अचिन्त्याव्यक्तरूपा च अर्यमा अमलेश्वरी ।

अमृतार्णवमध्यस्था अर्कमण्डलवासिनी ॥५॥
अव्यक्तलक्षणाक्षोभा अजरा अमरार्चिता ।
अणिमादिगुणाधारा अम्बराम्बरधारिणी ॥६॥
अर्धमात्रात्मिका अर्द्धा अरिषड्वर्गनाशिनी ।
अरविन्दनिभानाथा अरविन्दनिभेक्षणा ॥७॥
अञ्जनाद्रिप्रतीकाशा अमराम्बरभूषिता ।
अदितिश्चाजपाऽविद्याध्वंसिनी चाऽन्तरात्मिका ॥८॥
अनन्ता अम्बुजाक्षी च अमावास्या अमातिथिः ।
आद्यादेवी आदिशक्तिराकृतिश्चायतानना ॥९॥
आदित्यमण्डलगता आदित्यगणसेविता ।
आचार्यरूपा आचारा आम्रवृक्षनिवासिनी ॥१०॥
आर्द्रा आर्द्रप्रतीकाशा आकाशान्तरचारिणी ।
आद्यक्षरसमायुक्ता आरम्भारम्भरूपिणी ॥११॥
आग्नेयी आसनस्था च आनन्दानन्दविग्रहा ।
आद्यानन्दा आम्रगुणा आशा आनन्दविग्रहा ॥१२॥
इडापिङ्गलरूपा च इन्द्रनीलनिभा इडा ।
इन्दुरूपा इन्दुधरा इन्द्राणी इन्द्रपूजिता ॥१३॥
इन्द्राक्षी इन्द्रमाता च इन्दुमण्डलरूपिणी ।
इन्द्रकोदण्डसंयुक्ता इषुसन्धानकारिणी ॥१४॥
ईश्वरी ईश्वरा ईशा ईशानत्रयधारिणी ।
ईडा ईडामयी ईला ईलासन्नतरुप्रिया ॥१५॥
उडुप्रभा उडुमती उडुमण्डलवासिनी ।
उमा उत्सवसम्पन्ना उषा उडुनिभानना ॥१६॥
उदकोदकरूपा च उदयाचलसंस्थिता ।
उद्मुखी उदासीना उदीची उर्वशी उदा ॥१७॥

ऊरस्वना ऊरुश्रोणी ऊरुचारुविलोचना ।
ऊद्धर्वास्या ऊर्ध्वकेशी च ऊर्मिलोलविलोचना ॥१८॥
ऊर्ध्वाम्नायस्थिता ऊर्ध्वा ऋद्धिदा ऋद्धिरूपिणी ।
ऋजुरूपा ऋजुधर्मा ऋजुमार्गव्यवस्थिता ॥१९॥
ऋग्वेदरूपा ऋणहा ऋजुधर्मप्रवर्तिनी ।
ऋतुमती ऋतुमार्गस्था ऋकाराक्षररूपिणी ॥२०॥
लूनारिर्वरसम्भूता लूतादिविषभञ्जिनी ।
लूनार्त्तिहारिणी लूता ॐकाराक्षररूपिणी ॥२१॥
एका एकाक्षरीमूत्तिरेकमानैकनिष्ठिका ।
एकान्तवासिनी एणा एणशावकलोचना ॥२२॥
ऐन्द्री ऐरावतीरूढा ऐहिकामुष्मिकप्रदा ।
ॐकारी ह्योषधी ह्योषा ओतप्रोतविधायिनी ॥२३॥
और्वी औषधसम्पन्ना औपासनफलप्रदा ।
अन्तमध्यस्थिता देवी अन्धकासुरघातिनी ॥२४॥
कात्यायिनी कालरात्रिः कामाक्षी कामसुन्दरी ।
कमला कासिनी कान्ता कामदा कालकर्णिका ॥२५॥
करिकुम्भस्तनी कन्या करवीरसुवासिनी ।
कल्याणी कुण्डलवती कुरुक्षेत्रनिवासिनी ॥२६॥
अरविन्ददलाकारा कुण्डली कुमुदालया ।
कालजिह्वा करालास्या कालिका कालरूपिणी ॥२७॥
कमनीयगुणा कान्तिः कराधारा कुमुद्वती ।
कौशिकी कमलाधारा कामतारप्रभञ्जिनी ॥२८॥
कौमारी करुणापाङ्गी कुन्ददला करिप्रिया ।
केशिनी केशवनुता कदम्बकुसुमप्रिया ॥२९॥
कालिन्दी कालिकाकाञ्ची कलशोद्भवसंस्तुता ।

कामामाता ऋतुमती कामरूपा क्रियावती ॥३०॥
कुमारी कुन्दनिलया किरातकीलवाहना ।
कैकेयी कोकिलालापा केतकीकुसुमप्रिया ॥३१॥
कमण्डलुधरा क्रूरा कर्मनिर्मूलकारिणी ।
कलहंसगतिः कुब्जा कृतकौतुकमङ्गला ॥३२॥
कस्तूरीतिलका कम्रा करीन्द्रगमना कुहुः ।
कर्पूरलेपना कृष्णा कपिला कुहराश्रया ॥३३॥
कूटस्था कुधरा कम्रा कुक्षिस्थाखिलविष्टपा ।
खड्गङ्गखेटधरा खर्वी खेचरी खगवाहना ॥३४॥
खट्वाङ्गधारिणी ख्याता खगराजोपरिस्थिता ।
खलघ्नी खण्डितजरा खडाख्यातिप्रदायिनी ॥३५॥
खण्डेन्दुतिलका गङ्गा गणेशगुहपूजिता ।
गायत्री गोमती गीता गान्धारी गानलोलुपा ॥३६॥
गौतमी गामिनी गन्धा गन्धर्वाप्सरसेविता ।
गोविन्दचरणक्रान्ता गुणत्रयविभाविता ॥३७॥
गन्धर्वी ग्लौहरी गात्रा गिरीशा गहनागमा ।
गुहावासा गुणवती गुरुपापप्रणाशिनी ॥३८॥
गुर्वी गुणवती गुह्या गोपिका गुणदायिनी ।
गिरिजा गुहमातङ्गी गरुडध्वजवल्लभा ॥३९॥
गर्वापहारिणी गोदा गोकुलस्था गदाधरा ।
गोकर्णनिलया गुह्या गुह्यमण्डलवर्त्तिनी ॥४०॥
घर्मदा घनदा घण्टा घोरदानवमर्दिनी ।
घृणिमन्त्रचया घोषा घनसम्पत्प्रदायिनी ॥४१॥
घण्टारवप्रिया घोणी घृणिसन्तुष्टकारिणी ।
घातारिमण्डला घूर्णा घृताची घनवेगिनी ॥४२॥

ज्ञानाचारवती चर्चा चर्विणी चारुहासिनी ।
चतुरा चन्द्रिका चित्रा चित्रमालाविभूषिता ॥४३॥
चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ।
चूरिता चित्रविश्रान्ता चन्द्राभा चूर्णकुन्तला ॥४४॥
चन्द्रहासा चारुगात्री चकोरी चन्द्रहासिनी ।
चन्द्रिका चित्रधात्री च चोरा चौरा च चण्डिका ॥४५॥
चञ्चद्वाग्वादिनी चन्द्रचूडा चन्द्रविलासिनी ।
चारुचन्दनलिप्ताङ्गी चञ्चच्चामरवीजिता ॥४६॥
चारुमध्या चारुगतिश्चन्द्रिका चन्द्ररूपिणी ।
चारुभोगप्रियाचार्या चरिता चक्रधारिणी ॥४७॥
चन्द्रमण्डलमध्यस्था चन्द्रमण्डलदर्पणा ।
चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी ॥४८॥
चित्स्वरूपा चन्द्रवती चन्द्रभा चन्दनप्रिया ।
चोदयित्री चिरप्रज्ञा चातकाधानहेतुकी ॥४९॥
छत्रप्रीता च्छत्रधरा च्छाया च्छेदपरिच्छदा ।
छायादेवी च्छिद्रनखी च्छिन्नेद्रिया विसर्पिणी ॥५०॥
अन्दोनुष्टुप्प्रतिष्ठान्ता छिन्द्रोपद्रवच्छेदिनी ।
छन्दोच्छत्रेश्वरीच्छिन्ना च्छुरिकाच्छेदनक्रिया ॥५१॥
जननी जन्मरहिता जातवेदा जगन्मयी ।
जाह्नवी जटिला जैत्री जरामरणवर्जिता ॥५२॥
जम्बूद्वीपवती ज्योत्स्ना जयन्ती जयसाधिनी ।
जितेन्द्रिया जितक्रोधा जितामित्रा जगत्प्रिया ॥५३॥
जातरूपमयी जिह्वा जानकी जगती जरा ।
जनित्री जह्नुतनया जगत्त्रयहितैषिणी ॥५४॥
ज्वालावती जपवती ज्वालघ्नी जितविष्टपा ।

जिह्वाक्रान्तमहाज्वाला जाग्रती ज्वलदैवता ॥५५॥
ज्वलन्ती ज्वलदा ज्येष्ठा ज्याघोषास्फोटदिङ्मुखा ।
जम्भनी जृम्भिणी जृम्भा ज्वलन्मारीककुञ्जला ॥५६॥
झिल्लिकागणनिर्घोषा झञ्झामारुतवेगिनी ।
झल्लरीवाद्यकुशला झषरूपा झषध्वजा ॥५७॥
टङ्कबाणसमायुक्ता टङ्किणी टङ्कवेगिनी ।
टङ्कीकृतगुणाशेषा टङ्कनीयमहोदरा ॥५८॥
टङ्काकारिणी देवी टट्टशब्दनिनादिनी ।
डाकिनी डामरी डिम्भा डुण्डुभानैकवर्जिता ॥५९॥
डामरीतन्त्रमार्गस्था डमड्डमरुवादिनी ।
डिण्डीरविहसा डिम्भा डोलक्रीडापरायणा ॥६०॥
ढुण्ढिविघ्नेशजननी ढक्काहस्ता ढिरिप्रिया ।
त्रिप्रिया ज्ञानदाशेषा तरुणी तरुणीत्रयी ॥६१॥
त्रिगुणा त्रिपदा तन्त्री तुलसी तुरगासना ।
त्रिविक्रमपदाक्रान्ता तुरीयपदगामिनी ॥६२॥
तरुणादित्यसङ्काशा तामसी तुहिनाश्रया ।
त्रिकालज्ञानसम्पन्ना त्रिवली त्रिविलोचना ॥६३॥
त्रिशक्तिस्त्रिपुरा तुङ्गा तुरङ्गवदना तटी ।
तिमिङ्गिलगिला तीव्रा त्रिस्रोतास्तामसार्दिनी ॥६४॥
तन्त्रा तन्त्रविशेषज्ञा तनुमध्या त्रिपिष्टपा ।
त्रिसन्ध्या त्रिस्तनी तोषा तास्था तालप्रयातिनी ॥६५॥
ताटङ्किनी तुषाराभा तुहिनाचलवासिनी ।
तन्तुजालसमायुक्ता तारहारावलिप्रिया ॥६६॥
तिलकर्मप्रिया तीर्था तमालकुसुमाकृतिः ।
तारका त्रिपुरा तन्वी त्रिशङ्कुपरिवारिता ॥६७॥

तत्त्वोदरी तिलाभासा ताटङ्कोपरिशोभिता ।
त्रिजटा तैत्तिरी तृष्णा त्रिविधा तरुणाकृतिः ॥६८॥
तप्तकाञ्चनसंकाशा तप्तकाञ्चनभूषणा ।
त्र्यम्बका च त्रिवर्णा च त्रिकालज्ञानदायिनी ॥६९॥
तर्पणा तृप्तिदा तृप्ता तामसी तुम्बुरुस्तुता ।
तार्क्ष्यस्था त्रिगुणाकारा त्रितुङ्गी तनुवल्लरी ॥७०॥
थकारधारिणी थान्ता दोहिनी दीनवत्सला ।
दानवान्तकरी दुर्गा दुर्गासुरनिबर्हणी ॥७१॥
देवकी देवमाता च द्रौपदी दुन्दुभिस्वना ।
देवयानी दुरावासा दरिद्रच्छेदिनी दिवा ॥७२॥
दामोदरप्रिया दीप्ता दण्डिनी देवपूजिता ।
दण्डकारण्यनिलया देवतादित्यरूपिणी ॥७३॥
देववन्द्या दिविषदा द्वेषिणी दानवाकृतिः ।
दीनानाथस्तुता दीक्षा दिग्वासा देवमोहिनी ॥७४॥
धात्री धनुर्धरा धेनुर्धरणी धर्मधारिणी ।
धुरन्धरधराधारा धनदा धान्यदोहिनी ॥७५॥
धर्मशीला धनाध्यक्षा धनुर्वेदविशारदा ।
धृतिधन्या धृतिपदा धर्मराजप्रिया ध्रुवा ॥७६॥
धूमावती धूमकेशी धर्मशास्त्रप्रवर्त्तिनी ।
नन्दा नन्दप्रिया नुन्ना नुन्नता नन्दनात्मिका ॥७७॥
नर्मदा नलिनी नीला नीलकण्ठसमाश्रया ।
नारायणप्रिया नित्या निर्मला निर्गुणा निधिः ॥७८॥
निराधारा निरुपमा नित्यशुद्धा निरञ्जना ।
नादबिन्दुकलातीता नादबिन्दुकलात्मिका ॥७९॥
नारसिंही नगधरा नृवरा नागभूषणा ।

नरकक्लेशशमनी नारायणपदोद्भवा ॥८०॥
नीरवन्ध्या निराकारा नारदप्रियकारिणी ।
नानाज्योतिः पदाख्याता निराधिर्निर्मलात्मिका ॥८१॥
नवसूत्रधरा नीतिर्निरुपद्रवकारिणी ।
नदजा नवरत्नाढ्या नैमिषारण्यवासिनी ॥८२॥
नवनीतप्रिया नारी नीलजीमूतनिस्वना ।
निमेषाद्या नदीरूपा नीरग्रीवा नरेश्वरी ॥८३॥
नानावरी निशुम्भघ्नी नागलोकनिवासिनी ।
नवजाम्बूनदप्रख्या नागलोकाधिदेवता ॥८४॥
नूपुरक्रान्तचरणा नरचित्तप्रमोदिनी ।
निमग्नदक्षनमिता निर्घातसमनिस्वना ॥८५॥
नन्दनोद्यानिलया निर्व्यूहोपरिचारिणी ।
पार्वती परमामोदा पञ्चब्रह्मात्मिका परा ॥८६॥
पञ्चकोशविनिर्मुक्ता पञ्चपातकनाशिनी ।
परचित्तविधानज्ञा पञ्चिका पञ्चरूपिणी ॥८७॥
पूर्णिमा परमा प्रीतिः परतेजोऽपकर्षिणी ।
पुराणी पौरुषी पुण्या पुण्डरीक निभेक्षणा ॥८७॥
पातालतलनिर्मग्ना प्रीताप्रीतविवर्धिनी ।
पावनी पदनीहारा पेशला पाकशासना ॥८९॥
प्रजापतिपरिश्रान्ता पर्वतस्तनमण्डला ।
पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥९०॥
पद्मपत्रा पद्मपदा पद्मिनी प्रियभाषिणी ।
पशुपाशविनिर्मुक्ता पुरन्ध्री पुरशासनी ॥९१॥
पतिव्रता पवित्राङ्गी पुष्पवासपरायणा ।
पुष्करा पुरुषा पर्वा पारिजातसुमप्रिया ॥९२॥

प्रज्ञावती सुता पौत्री पत्रपूजा पयस्विनी ।
पट्टिपाशधरा पंक्तिः पितृलोकप्रदायिनी ॥९३॥
पुराणी पुण्यशीला च प्रणतार्त्तिविनाशिनी ।
प्रद्युम्नजननी प्रौढा पितामहपरिग्रहा ॥९४॥
पुण्डरीकपुरावासा पुण्डरीकनिभानना ।
पृथुजङ्घा पृथुभुजा पृथुपादा पृथूदरी ॥९५॥
प्रवालशान्ता पिङ्गाक्षी पीतवासा पिपीलिका ।
पर्जन्यभीमरूपा च पर्जन्याधिकशीतला ॥९६॥
पुराणवेदगम्या च पुराणवेदवन्दिता ।
पद्मरागप्रतीकाशा पद्मरागस्वरूपिणी ॥९७॥
पद्माक्षी पद्मपत्राक्षी पद्ममालाविभूषिता ।
पाञ्चाली पञ्चनी पञ्चा पञ्चाननहृदयमोहिनी ॥९८॥
पञ्चकूटस्थिता प्राची पञ्चाननविवाहिनी ।
पाशिनी पाशहस्ता च पशुपाशविनाशिनी ॥९९॥
पशुपाशसमुच्छेदकारिणी पशुघातिनी ।
परश्वाभा पर्शुहस्ता परलोकभयापहा ॥१००॥
फलिनी फलहस्ता च फलाफलफलप्रदा ।
फणिकङ्कणहस्ता च फणिनूपुरधारिणी ॥१०१॥
फुत्कारकारिणी फेरुः फुलिङ्गा च फुलिङ्गिनी ।
फलदा फलदात्री च फणिहस्ता फणामणिः ॥१०२॥
श्वेश्वरी च विश्वासा विश्वपापविनाशिनी ।
विशालाक्षी विशालाक्षा विशालमुक्तिधारिणी ॥१०३॥
बिम्बाधरा बिम्बरूपा विश्वा विद्या विनोदिनी ।
वेदगम्या वेदवन्द्या वेदवेदाङ्गपारगा ॥१०४॥
वेदाङ्गी वेदरूपा च वेदमन्त्रस्वरूपिणी ।

वाशिनी वासिनी वश्या वसुदा वसुदायिनी ॥१०५॥
वसुदा वसुराध्या च वसुदानपरायणा ।
वासवी वासवाराध्या वामदेवविलासिनी ॥१०६॥
बहुदा बहुरूपा च बहुबाहुविलासिनी ।
बहुनेत्रा बहुलास्या बहुहस्ता बहुस्तना ॥१०७॥
बह्वा बह्वानना बाला बहुविघ्नविनाशिनी ।
वल्लवी वल्लवप्रीतिर्वल्लिनी बहुरूपिणी ॥१०८॥
बलाराध्या बलारातिर्बलवैरिनिषेविता ।
वाद्यप्रिया वाद्यलता वीणावादनतत्परा ॥१०९॥
वामदेवप्रिया वामी वासुदेवाभिवन्दिता ।
वारणा वारणाधारा वरवाटिविहारिणी ॥११०॥
वारण्या वरदा वन्या वनमालाविभूषणा ।
बलाका बालिनी वीरा वैद्यशास्त्रविशारदा ॥१११॥
वाराही वारणी वीरा वाक्पतिश्च वरप्रदा ।
वसुधा वसुपात्री च वसुवासुकिरूपिणी ॥११२॥
वाग्देवी वक्ररूपा च वेदवादेविनोदिनी ।
वन्दनीया वरारोहा वराङ्गी वरलोचना ॥११३॥
वरास्या वरहस्ता च वरदा वरशालिनी ।
वृन्दा वृन्दारकाराध्या वृन्दावनविहारिणी ॥११४॥
वरुणा वरुणाराध्या वरुणानन्ददायिनी ।
ब्रह्मरूपा ब्रह्ममूर्तिर्ब्रह्माणी ब्रह्मसंस्तुता ॥११५॥
ब्रह्मी ब्रह्ममयी ब्रह्मा ब्रह्मानन्दस्वरूपिणी ।
वैष्णवी विष्णुरूपा च विष्णुचित्तप्रियङ्करी ॥११६॥
विद्या विद्याधराराध्या विद्यामन्त्रस्वरूपिणी ।
विशदा विशदाचारा विशदानन्ददायिनी ॥११७॥

विपुला विपुलश्रोणी विपुलस्तनमण्डला ।
विमला विमलाङ्गी च विमलाचारसंस्थिता ॥११८॥
विशिष्टयगम्यसुरतिर्विशिष्ठा वसुवेष्टिता ।
विकाशिनी विकाशाद्या विकचाम्बुजलोचना ॥११९॥
वशिष्ठी वारुणी विश्वा वैश्वानरप्रिया सदा ।
वाराणसीपराराध्या विश्वाविश्वस्वरूपिणी ॥१२०॥
भूतिर्भगवती भव्या भवानी भववल्लभा ।
भूतधात्री भूतमाता भूतिदा भूतिदायिनी ॥१२१॥
भवप्रिया भवानन्दा भवभीतिविनाशिनी ।
भीमा भीमस्वरूपा च भीमभूतगणावृता ॥१२२॥
भूषा भूषणरूपा च भुवनाभयकारिणी ।
भुवना भुवनाराध्या भाविनी भुवनेश्वरी ॥१२३॥
भेरुण्डा भैरवी भीमा भार्गवी भार्गवस्थिता ।
भयदा भयहन्त्री च भवनाथा भयङ्करी ॥१२४॥
भीतिर्भी भयहन्त्री च भूताचारमयास्थिता ।
भाग्या भगवती भागी भाग्यदा भाग्यमालिनी ॥१२५॥
भगिनी भागिनी भागा भागानन्दा भगोदरी ।
भगदा भगरूपा च भवदात्री भवार्दिता ॥१२६॥
भूतिर्भूमिर्भ्रमी भ्राभूर्भुकुटीकुटिलेक्षणा ।
भ्रान्तिहा भ्रान्तिदा भ्रान्तिर्भाविनी भृगुवन्दिता ॥१२७॥
भरणा भवनाधारा भारवी भारधारिणी ।
भवापहा भवाधारा भवभारविनाशिनी ॥१२८॥
भुजभूर्भुजभाकारा भाविनी भवभाविनी ।
भगलक्ष्मीर्भगाधारा भगसारा भगाङ्गणा ॥१२९॥
भगमूर्तिर्भगप्रीतिर्भगभागवती भया ।

भुजङ्गहारकण्ठी च भुजङ्गाङ्गदशोभिता ॥१३०॥
भुजङ्गपाशहस्ता च भुजङ्गभोगमण्डिता ।
भोगदा भागदात्री च भुक्तिमुक्तिप्रदायिनी ॥१३१॥
भुजगी भुजगीयुक्ता भगभाग्यपरा भया ।
भक्तानुकम्पिनी भक्ता भक्तानुरक्तमानसा ॥१३२॥
भक्तिगम्या भक्तिसाध्या भक्तानामार्त्तिनशिनी ।
महामाया महाविद्या महायोगेश्वरेश्वरी ॥१३३॥
मानदा मानिनी मान्या माननीया महेश्वरी ।
महेश्वरी महावक्त्रा महापातकनाशिनी ॥१३४॥
महामान्या महामन्त्रा महाकिल्विषनाशिनी ।
महामान्या महादेवी महामन्त्रस्वरूपिणी ॥१३५॥
महारूपा महाकान्तिर्महालक्ष्मीर्महामतिः ।
महातुष्टिर्महापुष्टिर्महावृत्तिर्महाधृतिः ॥१३६॥
महाकीर्तिर्महापूर्तिर्महामूर्त्तिर्महामतिः ।
मया मायावती माता महामायास्वरूपिणी ॥१३७॥
मोहिनी मोदिनी मत्ता मधुपानपरायणा ।
मातङ्गी मत्तमातङ्गी मातङ्गकुलमण्डिता ॥१३८॥
मदालसा मदामत्ता मदघूर्णितलोचना ।
मधुरा मधुराङ्गी च मधुरोष्ठी मधुप्रिया ॥१३९॥
मधुरा मधुरावाचा मधुपानविहारिणी ।
मन्दोदरी च मन्दा च मन्दैकगतिलालसा ॥१४०॥
मन्दारदामभूषाङ्गी मन्दारवनचारिणी ।
मदना मदनाधारा मदनालसलोचना ॥१४१॥
मदनी मादिनी माना मदनान्तककामिनी ।
मञ्जुस्वरा मञ्जुवक्त्रा मञ्जुमञ्जीरधारिणी ॥१४२॥

माधवी माधवाधारा माधवानन्ददायिनी ।
मानदा मानशीला च मानमान्या मनस्विनी ॥१४३॥
मित्रदा मित्ररूपा च मित्रा मुक्तिस्वरूपिणी ।
मधुकरी मधुप्रीतिर्मधुमत्यमलस्वना ॥१४४॥
मधुहा मधुहन्त्री च मधुसूदनवन्दिनी ।
माहेन्द्री मोहनीया च माहेन्द्रवन्दिता मही ॥१४५॥
महिषघ्नी महामान्या महिषासुरमर्दिनी ।
मर्दिनी मालिनी मान्या मेनका मूर्त्तिरूपिणी ॥१४६॥
मृणाली कोमलाङ्गी च मृणालभुजवल्लरी ।
मृणालहारमाला च मरालमदगामिनी ॥१४७॥
माहिषी महिषारूढा मृत्युभीतिक्षयङ्करी ।
याज्ञसेनी यज्ञसेनी यज्ञाङ्गी यज्ञरक्षिका ॥१४८॥
यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञरक्षिका ।
यामिनी यमुना याभ्या यया याया ययुर्यवा ॥१४९॥
यशस्विनी यशःपूर्णा यशोदा यशसाऽन्विता ।
यमुना यमदूती च यमरूपा यमोयमा ॥१५०॥
यमोद्धारा यमारातिर्यमामातार्यभाविता ।
यमीमया च यानाङ्गी यातायातस्वरूपिणी ॥१५१॥
यविनी यवरूपा च यवदा यवधारिणी ।
यवभोक्त्री यवावाणी यममूर्तिस्वरूपिणी ॥१५२॥
योगाद्या योगसंयुक्ता योगदा योगशालिनी ।
योनिरूपा योनियुक्ता योजनीया च योजनी ॥१५३॥
रतिरूपा रतिरामा रजनी राजनी रमा ।
रमणी रामणी रामा रतिरूपा रतिप्रिया ॥१५४॥
रक्ता नीरक्तचरणा रक्तानुरक्तमानसा ।

रसा रसवती रासा रसभोक्त्री रसस्वना ॥१५५॥
रसाङ्गी रसविस्तीर्णा रसना रसनावती ।
रूपिणी रूपसंयुक्ता रूपी रूपमती रतिः ॥१५६॥
रञ्जिनी रागिणी राज्ञी राजराजनिषेविता ।
रारञ्जी राजती राजी राजीवचारुलोचना ॥१५७॥
राजीवचारुवदना राजसी राजसोत्तमा ।
रजस्था रजसाधारा रजोमूर्ती रजोन्विता ॥१५८॥
रम्या रमणसम्पन्ना रघुनाथप्रियङ्करी ।
रामाराध्या रमामूर्ती रमणीया रमोत्तमा ॥१५९॥
रक्ताम्बरा च रक्ताक्षी रक्तपद्मविलोचना ।
रक्तपद्मस्थिता रक्ता रक्तपद्मनिवासिनी ॥१६०॥
रक्तपद्मधरा रक्तपद्मासननिवासिनी ।
रेवती रोहिणी रौद्री रुद्राणी रुद्रकामिनी ॥१६१॥
रुद्राक्षमालिनी रुद्रा रुद्रमूर्त्तिस्वरूपिणी ।
राध्या राध्यतमा राध्यराधिका रामवत्सला ॥१६२॥
रुचिरा रुचिराङ्गी च रुचा रुचिकरी रुचिः ।
रुरुनेत्रा रुचिराक्षी भैरवी चर्मवासिनी ॥१६३॥
रौरवान्तकरी ह्येषा रक्षा रक्षः स्वरूपिणी ।
लम्बोदरी च लम्बोष्ठी लम्बवक्त्रा च लम्बिनी ॥१६४॥
लम्बस्तनी लम्बहस्ता लम्बोदरनिषेविता ।
लक्ष्मीर्लक्ष्मीस्वरूपा च लक्ष्मीनाथप्रियङ्करी ॥१६५॥
लक्षणा लक्षणालक्ष्या लाक्षालोहितलोचना ।
लता च लतिका बाला लवङ्गी लोहितेक्षणा ॥१६६॥
लीला लीलावती लीला लालना लसनावती ।
लाङ्गली लाङ्गलाधारा लाङ्गरीपरिवन्दिता ॥१६७॥

लिपिर्लिपिमयी लेखा लिपिमूर्तिस्वरूपिणी ।
ललना ललनीलोला लङ्केश्वरनिषेविता ॥१६८॥
ललिता ललिताङ्गी च ललिता लकशालिनी ।
ललिता ललिताक्षी च ललनागणसेविता ॥१६९॥
लालसा लालिनी लास्या लयलास्यपरायणा ।
शान्तिः शान्तिकरी शान्ता शीता शीर्षशशीशिवा ॥१७०॥
शीतार्त्तशीतलरूपा शीतलाङ्गी शुभाशुभा ।
शाङ्करी शङ्करप्रीता शिवा शिवनितम्बिनी ॥१७१॥
शिवदा शिवरूपा च शिवोपरिनिषेदुषी ।
शाम्भवी शम्भुरूपा च शाश्वती च सरस्वती ॥१७२॥
शान्ता शान्तादरी शान्ता शान्तिः शान्तिप्रदायिनी ।
शारदा शरदा ज्योत्स्ना शारदीया शतानना ॥१७३॥
सीमन्ता सविनीशा च सामगानप्रकाशिनी ।
सामस्वती शतानन्दा शतानन्दातिनन्दिता ॥१७४॥
सीता सुवदना साध्वी शीतपानपरायणा ।
शर्वरी शर्वरीरूपा शिवाराधविनोदिनी ॥१७५॥
सीमन्तिनी च सीमन्तवीर्या सीमन्तसेविता ।
शैशवी शिवरूपा च शिशुभिः परिवेष्टिता ॥१७६॥
षण्मुखी षण्मुखीमाता षडाननिषेविता ।
षडङ्गयोगगम्या च षर्वा षर्वस्वरूपिणी ॥१७७॥
सुन्दरा सुन्दरी शुक्रा सुन्दरीगणसेविता ।
सुधाधारा सुधावाणी सुधामधुररूपिणी ॥१७८॥
सुरेश्वरी सुरानन्दा सुरासुरनिषेविता ।
सुरारिदलिनी सारा सौन्दर्यशालिनी सती ॥१७९॥
शुम्भहा शुम्भदलिनी सर्वमङ्गलमङ्गला ।

सर्वाणी सर्वदात्री च सर्वा सर्वस्वदायिनी ॥१८०॥
सर्वेशी सर्वजननी सर्वान्दस्वरूपिणी ।
सर्वसौन्दर्ययुक्ता च सर्वसौन्दर्यदायिनी ॥१८१॥
सर्वदुःस्वप्नशमनी सर्वमृत्युप्रणाशिनी ।
सर्वविघ्नविनाशा च सर्वमङ्गलदायिनी ॥१८२॥
सर्वकामप्रदा सर्वासर्वानन्दप्रदायिनी ।
सर्वैश्वर्यस्वरूपा च सर्वैश्वर्यप्रदायिनी ॥१८३॥
सर्वपापप्रशमनी सर्वपातकनाशिनी ।
सर्वज्ञानस्वरूपा च सर्वज्ञा सर्वदर्शना ॥१८४॥
सर्वार्थसाधिनी सिद्धा सिद्धचारणसेविता ।
सर्वदेवस्वरूपा च सर्वदेवमयी शुभा ॥१८५॥
सर्वाङ्गसुन्दरी सुश्रीः सर्वभौभाग्यदायिनी ।
सर्वकामप्रवीणा च सर्वकामप्रसाधिनी ॥१८६॥
सर्वकल्याणयुक्ता च सर्वाभरणभूषिता ।
सर्वभृङ्गारवेशाढ्या सर्वसम्पत्तिदायिनी ॥१८७॥
समारूपा शमीमूर्तिः शमीशमप्रवर्त्तिनी ।
सागरा सागरासाध्या सागरालवन्दिता ॥१८८॥
स्वरूपा सुस्वरूपा च सुकान्तिकुचमण्डला ।
सुमतिः सुमतिप्रख्या सुमतेर्दायिनी सुधा ॥१८९॥
सकला सकलाधारा सकलानन्ददायिनी ।
सुचिन्ता सुचरित्रा च सुपुण्याजनवन्दिता ॥१९०॥
सावित्री च संवित्री च सवितृमूर्त्तिपूजिता ।
सुमना सुमनाराध्या सुमनोगणवन्दिता ॥१९१॥
शामनी शमनी शामा सामान्यजनभाविता ।
स्वर्णप्रभा स्वर्णवर्णा स्वर्णाचलनिवासिनी ॥१९२॥

स्वर्गदा स्वर्गरूपा च स्वर्गभाग्यप्रदायिनी ।
स्मरारिप्राणदात्री च स्मरारिहृदयप्रिया ॥१९३॥
स्मृतिः स्मृतिस्वरूपा च स्मृतिगम्या स्मृतिप्रिया ।
स्मृतिगम्या स्मृतिप्राणा स्मृतिश्रुतिस्वरूपिणी ॥१९४॥
स्मररूपा स्मराराातिः स्मरजीवनदायिनी ।
स्मरणोन्मादिनी स्मारा स्मरांकुरितमानसा ॥१९५॥
सरसा सारसाङ्गी च सरसीभारसारिणी ।
सारसाचारसन्तुष्टय सारङ्गचारुलोचना ॥१९६॥
संसारसारसंसारा संसारभयहारिणी ।
संसारनिस्तारकर्मी संसारपापनाशिनी ॥१९७॥
संसारमूलशक्तिश्च संसारसाररूपिणी ।
सर्वसङ्ग्रामजयिनी सर्वशक्तिस्वरूपिणी ॥१९८॥
सुमुखी च सुवक्षोजा सुचारुकुटिलेक्षणा ।
सुभ्रूरुसुवचोवीची सुनासा सुविलोचना ॥१९९॥
सर्वव्याधिप्रशमनी सर्वविघ्नविनाशिनी ।
सर्वारम्भसमारम्भा सर्वसम्भाररूपिणी ॥२००॥
सालसाङ्गी सालकास्या महार्थार्थसुसाधिनी ।
सर्वमुक्तिस्वरूपा च सर्वरक्षास्वरूपिणी ॥२०१॥
हैमा हैमवती हैमी हिमाचलनिवासिनी ।
हिमाचलसुता हीरा हेमालङ्कारधारिणी ॥२०२॥
हिता हितार्थसंयुक्ता हितकर्मी हितार्थदा ।
हरधीश्च हराराध्या हरानन्दा हरोत्सुका ॥२०३॥
हारिणी हारसम्पन्ना हरिहारविभूषणा ।
हरिणी हररूपा च हरिराजनिवासिनी ॥२०४॥
हारस्था हरियुक्तिश्च हीङ्काराक्षररूपिणी ।

क्षमा क्षमावती क्षान्तिः क्षेत्रधर्मप्रवर्धिनी ॥२०५॥
क्षोणी क्षोभस्वरूपा च क्षुधाक्षीमूर्तिधारिणी ।
क्षयिणी क्षयकर्त्री च क्षयकरी क्षयङ्करी ॥२०६॥
क्षेमङ्करी क्षेममूर्त्तिः क्षमा क्षान्तिः क्षया क्षमा ।
इतीदं परमं गुह्यं नाम्नामष्टसहस्रकम् ॥२०७॥
गुह्येश्वर्या महाभाग शिवेनोक्तं घटोद्भव ।
एतस्य पठनाद्वापि धारणाद्वा विशेषतः ॥२०८॥
शिवतुल्यो भवेद्विप्र नात्र कार्या विचारणा ।
पुत्रार्थी पुत्रमाप्नोति धनार्थी लभते धनम् ॥२०९॥
कन्या वरमवाप्नोति वरः कन्यामनुत्तमाम् ।
विद्यार्थी लभते विद्यां मुक्त्यर्थी मुक्तिमाप्नुयात् ॥२१०॥
बन्ध्यापि लभते पुत्रमेतस्य श्रवणाद्विज ।
राजानो राजपुत्राश्च वशमायन्ति दर्शनात् ॥२११॥
यः पठेत्पाठयेद्वापि शृंणुयाद्वापि यो नरः ।
प्रातः कालेऽथ मध्याह्ने सायंकालेऽथवा पुनः ॥२१२॥
निशीथे वापि पठनात् गुह्येशी सुप्रसीदति ।
इदं गुह्यतरं देव्याः शिववक्त्राद्विनिर्गतम् ॥२१३॥
यस्मै कस्मै न दातव्यं न वक्तव्यं कदाचन ।
अत्यन्तगुरुभक्ताय दान्ताय सत्यवादिने ॥२१४॥
भक्तियुक्ताय दातव्य ब्राह्मणाय विशेषतः ।
अष्टम्यां च चतुर्दश्यां नवम्यां भौमवासरे ॥२१५॥
एतस्य पठनाद्देवि रुद्रतुल्यो भवेन्नरः ॥२१६॥

॥ श्रीस्कन्दपुराणे हिमवत्खण्डे गुह्येश्वरीसहस्रनाममालामन्त्रस्तोत्रं सम्पूर्णम् ॥

१२

॥ गुह्यकाल्याः सहस्रनामस्तोत्रम् ॥

महाकालसंहितायां

॥ पूर्वपीठिका ॥

देव्युवाच ॥

यदुक्तं भवता पूर्वं प्राणेश करुणावशात् ॥१॥
नाम्नां सहस्रं देव्यास्तु तदिदानीं वदप्रभो ।
श्री महाकाल उवाच ॥
अतिप्रीतोऽस्मि देवेशि तवाहं वचसामुना ॥२॥
सहस्रनामस्तोत्रं यत् सर्वेषामुत्तमोत्तमम् ।
सुगोपितं यद्यपि स्यात् कथयिष्ये तथापि ते ॥३॥
देव्याः सहस्रनामाख्यं स्तोत्रं पापौघमर्दनम् ।
मह्यं पुरा भुवः कल्पे त्रिपुरघ्नेन कीर्तितम् ॥४॥
आज्ञप्तश्च तथा देव्या प्रत्यक्षङ्गतया तया ।
त्वयैतत्प्रत्यहं पाठ्यं स्तोत्रं परमदुर्लभम् ॥५॥
महापातकविध्वंसि सर्वसिद्धिविधायकम् ।
महाभाग्यप्रदं दिव्यं सङ्ग्रामे जयकारकम् ॥६॥
विपक्षदर्पदलनं विपदम्भोधितारकम् ।
कृत्याभिचारशमनं महाविभवदायकम् ॥७॥
मनश्चिन्तितकार्यैकसाधकं वाग्मिताकरम् ।

आयुरारोग्यजनकं बलपुष्टिप्रदं परम् ॥८॥
नृपतस्करभीतिघ्नं विवादे जयवर्धनम् ।
परशत्रुक्षयकरं कैवल्यामृतहैतुकम् ॥९॥
सिद्धिरत्नाकरं श्रेष्ठं सद्यः प्रत्ययकारकम् ।
नातः परतरं देव्याः अस्त्यन्यत् तुष्टिदं परमम् ॥१०॥
नाम्नां सहस्रं गुह्यायाः कथयिष्यामि ते प्रिये ।
यत्पूर्वं सर्वदिवानां मन्त्ररूपतया स्थितम् ॥११॥
दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
प्राणवत् कण्ठदेशस्थं यत्स्वप्नेऽप्यपरिच्युतम् ॥१२॥
देवर्षीणां मुनीनां च वेदवद्रसनागतम् ।
सार्वभौममहीपालैः प्रत्यहं यच्च पठ्यते ॥१३॥
मया च त्रिपुरघ्नेन जप्यते यद्दिने दिने ।
यस्मात् परं नो भविता स्तोत्रं त्रिजगतीतले ॥१४॥
वेदवन्मन्त्रवद् यच्च शिववक्त्रविनिर्गतम् ।
यन्नान्यतन्त्रागमेषु यामले डामरे न च ॥ १५॥
न चान्यसंहिताग्रन्थे नैव ब्रह्माण्डगोलके ।
संसारसागरं तर्तुमेतत् पोतवदिष्यते ॥१६॥
नानाविधमहासिद्धिकोषरूपं महोदयम् ।
या देवी सर्वदिवानां या माता जगदोकसाम् ॥१७॥
या सृष्टिकर्त्री देवानां विश्वावित्री च या स्मृता ।
या च त्रिलोक्याः संहर्त्री या दात्री सर्वसम्पदाम् ॥१८॥
ब्रह्माण्डं या च विष्टभ्य तिष्ठत्यमरपूजिता ।
पुराणोपनिषद्वेद्या या चैका जगदम्बिका ॥१९॥
यस्याः परं नान्यदस्ति किमपीह जगत्त्रये ।

सा गुह्यास्य प्रसादेन वशीभूतेव तिष्ठति ॥२०॥
अत एव महत्स्तोत्रमेतज्जगति दुर्लभम् ।
पठनीयं प्रयत्नेन परं पदमभीप्सुभिः ॥२१॥
किमन्यैः स्तोत्रविस्तारैर्नायं चेत् पठितोऽभवत् ।
किमन्यैः स्तोत्रविस्तारैरयं चेत् पठितो भवेत् ॥२२॥
दुर्वाससे नारदाय कपिलायात्रये तथा ।
दक्षाय च वसिष्ठाय संवर्ताय च विष्णवे ॥२३॥
अन्येभ्योऽपि देवेभ्योऽवदं स्तोत्रमिदं पुरा ।
इदानीं कथयिष्यामि तव त्रिदशवन्दिते ॥२४॥
इदं शृणुष्व यत्नेन श्रुत्वा चैवावधारय ।
धृत्वाऽन्येभ्योऽपि देहि त्वं यान् वै कृपयसे सदा ॥२५॥

॥ अथ विनियोगः ॥

ॐ अस्य श्रीगुह्यकालीसहस्रनामस्तोत्रस्य श्रीत्रिपुरघ्न ऋषिः । अनुष्टुप् छन्दः । एकवक्त्रादिशतवक्त्रान्ता श्रीगुह्यकालीदेवता । फ्रूँ बीजम् । ख्रैँ शक्तिः । छ्रीँ ख्रीँ कीलकम् । पुरुषार्थचतुष्टयसाधनपूर्वकश्रीचण्डयोगेश्वरीप्रीत्यर्थे जपे विनियोगः ॥

अथ श्रीगुह्यकालीसहस्रनामस्तोत्रम् ।
ॐ फ्रें कराली चामुण्डा चण्डयोगेश्वरी शिवा ।
दुर्गा कात्यायनी सिद्धिविकराली मनोजवा ॥१॥
उल्कामुखी फेरुरावा भीषणा भैरवासना ।
कपालिनी कालरात्रिर्गौरी कङ्कालधारिणी ॥२॥
श्मशानवासिनी प्रेतासना रक्तोदधिप्रिया ।
योगमाता महारात्रिः पञ्चकालानलस्थिता ॥३॥
रुद्राणी रौद्ररूपा च रुधिरद्वीपचारिणी ।
मुण्डमालाधरा चण्डी बलवर्वरकुन्तला ॥४॥

मेधा महाडाकिनी च योगिनी योगिवन्दिता ।
कौलिनी कुरुकुल्ला च घोरा पिङ्गजटा जया ॥५॥
सावित्री वेदजननी गायत्री गगनालया ।
नवपञ्चमहाचक्रनिलया दारुणस्वना ॥६॥
उग्रा कपर्दिगृहिणी जगदाद्या जनाश्रया ।
कालकर्णी कुण्डलिनी भूतप्रेतगणाधिपा ॥७॥
जालन्धरी मसीदेहा पूर्णानन्दपतङ्गिनी ।
पालिनी पावकाभासा प्रसन्ना परमेश्वरी ॥८॥
रतिप्रिया रोगहरी नागहारा नगात्मजा ।
अव्यया वीतरागा च भवानी भूतधारिणी ॥९॥
कादम्बिनी नीलदेहा काली कादम्बरीप्रिया ।
माननीया महादेवी महामण्डलवर्तिनी ॥१०॥
महामांसाशनीशानी चिद्रूपा वागगोचरा ।
यज्ञाम्बुजामनादेवी दर्वीकरविभूषिता ॥११॥
चण्डमुण्डप्रमथनी खेचरी खेचरोदिता ।
तमालश्यामला तीव्रा तापिनी तापनाशिनी ॥१२॥
महामाया महादंष्ट्रा महोरगविराजिता ।
लम्बोदरी लोलजटा लक्ष्म्यालक्ष्मीप्रदायिनी ॥१३॥
धात्री धाराधराकारा धोरणी धावनप्रिया ।
हरजाया हराराध्या हरिवक्त्रा हरीश्वरी ॥१४॥
विश्वेश्वरी वज्रनखी स्वरारोहा बलप्रदा ।
घोणकी घर्घरारावा घोराघौघप्रणाशिनी ॥१५॥
कल्पान्तकारिणी भीमा ज्वालामालिन्यवामया ।
सृष्टिः स्थितिः क्षोभणा च कराला चापराजिता ॥१६॥

वज्रहस्तानन्तशक्तिर्विरूपा च परापरा ।
ब्रह्माण्डमर्दिनी प्रध्वंसिनी लक्षभुजा सती ॥१७॥
विद्युज्जिह्वा महादंष्ट्रा छायाध्वरसुताद्यहृत् ।
महाकालाग्निमूर्तिश्च मेघनादा कटङ्कटा ॥१८॥
प्रदीप्ता विश्वरूपा च जीवदात्री जनेश्वरी ।
साक्षिणी शर्वरी शान्ता शममार्गप्रकाशिका ॥१९॥
क्षेत्रज्ञा क्षेपणी क्षम्याऽक्षता क्षामोदरी क्षितिः ।
अप्रमेया कुलाचारकर्त्री कौलिकपालिनी ॥२०॥
माननीया मनोगम्या मेनानन्दप्रदायिनी ।
सिद्धान्तखनिरध्यक्षा मुण्डिनी मण्डलप्रिया ॥२१॥
बाला च युवती वृद्धा वयोतीता बलप्रदा ।
रत्नमालाधरा दान्ता दर्वीकरविराजिता ॥२२॥
धर्ममूर्तिर्ध्वान्तरुचिर्धरित्री धावनप्रिया ।
सङ्कल्पिनी कल्पकरी कलातीता कलस्वना ॥२३॥
वसुन्धरा बोधदात्री वर्णिनी वानरानरा ।
विद्या विद्यात्मिका वन्या बन्धनी बन्धनाशिनी ॥२४॥
गेया जटाजटरम्या जरती जाह्नवी जडा ।
तारिणी तीर्थरूपा च तपनीया तनूदरी ॥२५॥
तापत्रयहरा तापी तपस्या तापसप्रिया ।
भोगिभूष्या भोगवती भगिनी भगमालिनी ॥२६॥
भक्तिलभ्या भावगम्या भूतिदा भववल्लभा ।
स्वाहारूपा स्वधारूपा वषट्कारस्वरूपिणी ॥२७॥
हन्ता कृतिर्नमोरूपा यज्ञादिर्यज्ञसम्भवा ।
स्फ्यसूर्पचमसाकारा स्रक्स्रु वाकृतिधारिणी ॥२८॥

उद्गीथर्हिंकारदेहा नमः स्वस्तिप्रकाशिनी ।
ऋग्यजुः सामरूपा च मन्त्रब्राह्मणरूपिणी ॥२९॥
सर्वशाखामयी खर्वा पीवर्युपनिषद्बुधा ।
रौद्री मृत्युञ्जयाचिन्तामणिर्वैहायसी धृतिः ॥३०॥
तार्तीया हंसिनी चान्द्री तारा त्रैविक्रमी स्थितिः ।
योगिनी डाकिनी धारा वैद्युती विनयप्रदा ॥३१॥
उपांशुर्मानसी वाच्या रोचना रुचिदायिनी ।
सत्वाकृतिस्तमोरूपा राजसी गुणवर्जिता ॥३२॥
आदिसर्गादिकालीनभानवी नाभसी तथा ।
मूलाधारा कुण्डलिनी स्वाधिष्ठानपरायणा ॥३३॥
मणिपूरकवासा च विशुद्धानाहता तथा ।
आज्ञा प्रज्ञा महासंज्ञा वर्वरा व्योमचारिणी ॥३४॥
बृहद्रथन्तराकारा ज्येष्ठा चाथर्वणी तथा ।
प्राजापत्या महाब्राह्मी हूंहूङ्कारा पतङ्गिनी ॥३५॥
राक्षसी दानवी भूतिः पिशाची प्रत्यनीकरा ।
उदात्ताप्यनुदात्ता च स्वरिता निःस्वराप्यजा ॥३६॥
निष्कला पुष्कला साध्वी सा नुता खण्डरूपिणी ।
गूढा पुराणा चरमा प्राग्भवी वामनी ध्रुवा ॥३७॥
काकीमुखी साकला च स्थावरा जङ्गमेश्वरी ।
ईडा च पिङ्गला चैव सुषुम्णा ध्यानगोचरा ॥३८॥
सर्गा विसर्गा धमनी कम्पिनी बन्धनी हिता ।
सङ्कोचिनी भासुरा च निम्ना दृप्ता प्रकाशिनी ॥३९॥
प्रबुद्धा क्षेपणी क्षिप्ता पूर्णालस्या विलम्बिता ।
आवेशिनी घर्घरा च रूक्षा क्लिन्ना सरस्वती ॥४०॥

स्निग्धा चण्डा कुहूः पूषा वारणा च यशस्विनी ।
गान्धारी शङ्खिनी चैव हस्तिजिह्वा पयस्विनी ॥४१॥
विश्वोदरालम्बुषा च बिभ्रा तेजस्विनी सती ।
अव्यक्ता गालनी मन्दा मुदिता चेतनापि च ॥४२॥
द्रावणी चपला लम्बा भ्रामरी मधुमत्यपि ।
धर्मा रसवहा चण्डी सौवीरी कपिला तथा ॥४३॥
रण्डोत्तरा कर्षिणी च रेवती सुमुखी नटी ।
रजन्याप्यायनी विश्वदूता चन्द्रा कपर्दिनी ॥४४॥
नन्दा चन्द्रावत्ती मैत्री विशालापि च माण्डवी ।
विचित्रा लोहिनीकल्पा सुकल्पा पूतनापि च ॥४५॥
धोरणी धारणी हेला धीरा वेगवती जटा ।
अग्निज्वाला च सुरभी विवर्णा कृन्तनी तथा ॥४६॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
तपस्विनी स्वप्नवहा संमोहा कोटरा चला ॥४७॥
विकल्पा लम्बिका मूला तन्द्रावत्यपि घण्टिका ।
अविग्रहा च कैवल्या तुरीया चापुनर्भवा ॥४८॥
विभ्रान्तिश्च प्रशान्ता च योगिनिः श्रेण्यलक्षिता ।
निर्वाणा स्वस्तिका वृद्धिर्निवृत्तिश्च महोदया ॥४९॥
बोध्याऽविद्या च तामिस्रा वासना योगमेदिनी ।
निरञ्जना च प्रकृतिः सत्तारव्या पारमार्थिकी ॥५०॥
प्रतिबिम्बनिराभासा सदसद्रूपधारिणी ।
उपशान्ता च चैतन्या कूटा विज्ञानमय्यपि ॥५१॥
शक्तिविद्या वासिता च मोदिनी मुदितानना ।
अनया प्रवहा व्याडी सर्वज्ञा शरणप्रदा ॥५२॥

वारुणी मार्जनीभाषा प्रतिमा बृहती खला ।
प्रतीच्छा प्रमितिः प्रीतिः कुहिका तर्पणप्रिया ॥५३॥
स्वस्तिका सर्वतोभद्रा गायत्री प्रणवात्मिका ।
सावित्री वेदजननी निगमाचारबोधिनी ॥५४॥
विकराला कराला च ज्वालाजालैकमालिनी ।
भीमा च क्षोभणानन्ता वीरा वज्रायुधा तथा ॥५५॥
प्रध्वंसिनी च मालङ्का विश्वमर्दिन्यवीक्षिता ।
मृत्युः सहस्रबाहुश्च घोरदंष्ट्रा वलाहकी ॥५६॥
पिङ्गा पिङ्गशता दीप्ता प्रचण्डा सर्वतोमुखी ।
विदारिणी विश्वरूपा विक्रान्ता भूतभावनी ॥५७॥
विद्राविणी मोक्षदात्री कालचक्रेश्वरी नटी ।
तप्तहाटकवर्णा च कृतान्ता भ्रान्तिभञ्जिनी ॥५८॥
सर्वतेजोमयी भव्या दितिशोककरी कृतिः ।
महाक्रुद्धा श्मशानस्था कपालस्रगलङ्कृता ॥५९॥
कालातिकाला कालान्तकरीतिः करुणानिधिः ।
महाघोरा घोरतरा संहारकरिणी तथा ॥६०॥
अनादिश्च महोन्मत्ता भूतधात्र्यसितेक्षणा ।
भीष्माकारा च वक्राङ्गी बहुपादैकपादिका ॥६१॥
कुलाङ्गना कुलाराध्या कुलमार्गरतेश्वरी ।
दिगम्बरा मुक्तकेशी वज्रमुष्टिर्निरिन्धनी ॥६२॥
सम्मोहिनी क्षोभकरी स्तम्भिनी वश्यकारिणी ।
दुर्धर्षा दर्पदलनी त्रैलोक्यजननी जया ॥६३॥
उन्मादोच्चाटनकरी कृत्या कृत्याविघातिनी ।
विरूपा कालरात्रिश्च महारात्रिर्मनोन्मनी ॥६४॥

महावीर्या गूढनिद्रा चण्डदोर्दण्डमण्डिता ।
निर्मला शूलिनी तन्त्रा वज्रिणी चापधारिणी ॥६५॥
स्थूलोदरी च कुमुदा कामुका लिङ्गधारिणी ।
धटोदरी फेरवी च प्रवीणा कालसुन्दरी ॥६६॥
तारावती डमरुका भानुमण्डलमालिनी ।
एकानङ्गा पिङ्गलाक्षी प्रचण्डाक्षी शुभङ्करी ॥६७॥
विद्युत्केशी महामारी सूची तूण्डी च जृम्भका ।
प्रस्वापिनी महातीव्रा वरणीया वरप्रदा ॥६८॥
चण्डचण्डा ज्वलद्देहा लम्बोदर्यग्निमर्दिनी ।
महादन्तोल्कादृगम्बा ज्वालाजालजलन्धरी ॥६९॥
माया कृशा प्रभा रामा महाविभवदायिनी ।
पौरन्दरी विष्णुमाया कीर्तिः पुष्टिस्तनूदरी ॥७०॥
योगज्ञा योगदात्री च योगिनी योगिवल्लभा ।
सहस्रशीर्षपादा च सहस्रनयनोज्वला ॥७१॥
पानकर्त्री पावकाभा परामृतपरायणा ।
जगद्गतिर्जगज्जेत्री जन्मकालविमोचिनी ॥७२॥
मूलावतंसिनी मूला मौनव्रतपराङ्मुखी ।
ललिता लोलुपा लोला लक्षणीया ललामधृक् ॥७३॥
मातङ्गिनी भवानी च सर्वलोकेश्वरेश्वरी ।
पार्वती शम्भुदयिता महिषासुरमर्दिनी ॥७४॥
चण्डमुण्डापहर्त्री च रक्तबीजनिकृन्तनी ।
निशुम्भशुम्भमथनी देवराजवरप्रदा ॥७५॥
कल्याणकारिणी काली कोलमांसास्रपायिनी ।
खड्गहस्ता चर्मिणी च पाशिनी शक्तिधारिणी ॥७६॥

खट्वाङ्गिनी मुण्डधरा भुशुण्डी धनुरन्विता ।
चक्रघण्टान्विता बालप्रेतशैलप्रधारिणी ॥७७॥
नरकङ्कालनकुलसर्पहस्ता समुद्गरा ।
मुरलीधारिणी बलिकुण्डिनी डमरुप्रिया ॥७८॥
भिन्दिपालास्त्रिणी पूज्या साध्या परिघिणी तथा ।
पट्टिशप्रासिनी रम्या शतशो मुसलिन्यपि ॥७९॥
शिवापोतधरादण्डाङ्कुशहस्ता त्रिशूलिनी ।
रत्नकुम्भधरा दान्ता छुरिकाकुन्तदोर्युता ॥८०॥
कमण्डलुकरा क्षामा गृध्राढ्या पुष्पमालिनी ।
मांसखण्डकरा बीजपूरवत्यक्षरा क्षरा ॥८१॥
गदापरशुयष्ट्यङ्का मुष्टिनानलधारिणी ।
प्रभूता च पवित्रा च श्रेष्ठा पुण्यविवर्धनो ॥८२॥
प्रसन्नानन्दितमुखी विशिष्टा शिष्टपालिनी ।
कामरूपा कामगवी कमनीय कलावती ॥८३॥
गङ्गा कलिङ्गतनया सिप्रा गोदावरी मही ।
रेवा सरस्वती चन्द्रभागा कृष्णा दृषद्वती ॥८४॥
वाराणसी गयावन्ती काञ्ची मलयवासिनी ।
सर्वदेवीस्वरूपा च नानारूपधरामला ॥८५॥
लक्ष्मीर्गौरी महालक्ष्मी रत्नपूर्णा कृपामयी ।
दुर्गा च विजया घोरा पद्मावत्यमरेश्वरी ॥८६॥
वगला राजमातङ्गी चण्डी महिषमर्दिनी ।
त्रिपुटोच्छिष्टचाण्डाली भारुण्डा भुवनेश्वरी ॥८७॥
राजराजेश्वरी नित्यक्लिन्ना च जयभैरवी ।
चण्डयोगेश्वरी राज्यलक्ष्मी रुद्राण्यरुन्धती ॥८८॥

अश्वारूढा महागुह्या यन्त्रप्रमथनी तथा ।
धनलक्ष्मीर्विश्वलक्ष्मीर्वश्यकारिण्यकल्मषा ॥८९॥
त्वरिता च महाचण्डभैरवी परमेश्वरी ।
त्रैलोक्यविजया ज्वालामुखी दिक्करवासिनी ॥९०॥
महामन्त्रेश्वरी वज्रप्रस्तारिण्यजनावती ।
चण्डकापालेश्वरी च स्वर्णकोटेश्वरी तथा ॥९१॥
उग्रचण्डा श्मशानोग्रचण्डा वार्ताल्यजेश्वरी ।
चण्डोग्रा च प्रचण्डा च चण्डिका चण्डनायिका ॥९२॥
वाग्वादिनी मधुमती वारुणी तुम्बुरेश्वरी ।
वागीश्वरी च पूर्णेशी सौम्योग्रा कालभैरवी ॥९३॥
दिगम्बरा च धनदा कालरात्रिश्च कुब्जिका ।
किराटी शिवदूती च कालसङ्कर्षणी तथा ॥९४॥
कुक्कुटी सङ्कटा देवी चपलभ्रमराम्बिका ।
महार्णवेश्वरी नित्या जयझङ्केश्वरी तथा ॥९५॥
शवरी पिङ्गला बुद्धिप्रदा संसारतारिणी ।
विज्ञा महामोहिनी च बाला त्रिपुरसुन्दरी ॥९६॥
उग्रतारा चैकजटा तथा नीलसरस्वती ।
त्रिकण्टकी छिन्नमस्ता बोधिसत्वा रणेश्वरी ॥९७॥
ब्रह्माणी वैष्णवी माहेश्वरी कौमार्यलम्बुषा ।
वाराही नारसिंही च चामुण्डेन्द्राण्योनिजा ॥९८॥
चण्डेश्वरी चण्डघण्टा नाकुली मृत्युहारिणी ।
हंसेश्वरी मोक्षदा च शातकर्णी जलन्धरी ॥९९॥
स्वरकर्णी ऋक्षकर्णी सूर्पकर्णा बलाबला ।
महानीलेश्वरी जातवेतसी कोकतुण्डिका ॥१००॥

गुह्येश्वरी वज्रचण्डी महाविद्या च बाभ्रवी ।
शाकम्भरी दानवेशी डामरी चर्चिका तथा ॥१०१॥
एकवीरा जयन्ती च एकानंशा पताकिनी ।
नीललोहितरूपा च ब्रह्मवादिन्ययन्त्रिता ॥१०२॥
त्रिकालवेदिनी नीलकोरङ्गी रक्तदन्तिका ।
भूतभैरव्यनालम्बा कामाख्या कुलकुट्टनी ॥१०३॥
क्षेमङ्करी विश्वरूपा मायूर्यावेशिनी तथा ।
कामाङ्कुशा कालचण्डी भीमादेव्यर्धमस्तका ॥१०४॥
धूमावती योगनिद्रा ब्रह्मविष्णुनिकृन्तनी ।
चण्डोग्रकापालिनी च बोधिका हाटकेश्वरी ॥१०५॥
महामङ्गलचण्डी च तोवरा चण्डखेचरी ।
विशाला शक्तिसौपर्णी फेरुचण्डी मदोद्धता ॥१०६॥
कापालिका चञ्चरीका महाकामध्रुवापि च ।
विक्षेपणी भूततुण्डी मानस्तोका सुदामिनी ॥१०७॥
निर्मूलिनी राङ्कविणी सद्योजाता मदोत्कटा ।
वामदेवी महाघोरा महातत्पुरुषी तथा ॥१०८॥
ईशानी शाङ्करी भर्गो महादेवी कपर्दिनी ।
त्र्यम्बकी व्योमकेशी च मारी पाशुपती तथा ॥१०९॥
जयकाली धूमकाली ज्वालाकाल्युग्रकालिका ।
धनकाली घोरनादकाली कल्पान्तकालिका ॥११०॥
वेतालकाली कङ्कालकाली श्रीनग्नकालिका ।
रौद्रकाली घोरघोरतरकाली तथैव च ॥१११॥
ततो दुर्जयकाली च महामन्थानकालिका ।
आज्ञाकाली च संहारकाली सङ्ग्रामकालिका ॥११२॥

कृतान्तकाली तदनु तिग्मकाली ततः परम् ।
ततो महारात्रिकाली महारुधिरकालिका ॥११३॥
शवकाली भीमकाली चण्डकाली तथैव च ।
सन्त्रासकाली च ततः श्रीभयङ्करकालिका ॥११४॥
विकरालकाली श्रीघोरकाली विकटकालिका ।
करालकाली तदनु भोगकाली ततः परम् ॥११५॥
विभूतिकाली श्रीकालकाली दक्षिणकालिका ।
विद्याकाली वज्रकाली महाकाली भवेत्ततः ॥११६॥
ततः कामकलाकाली भद्रकाली तथैव च ।
श्मशानकालिकोन्मत्तकालिका मुण्डकालिका ॥११७॥
कुलकाली नादकाली सिद्धिकाली ततः परम् ।
उदारकाली सन्तापकाली चञ्चलकालिका ॥११८॥
डामरी कालिका भावकाली कुणपकालिका ।
कपालकाली च दिगम्बरकाली तथैव च ॥११९॥
उद्दामकाली प्रपञ्चकाली विजयकालिका ।
क्रतुकाली योगकाली तपःकाली तथैव च ॥१२०॥
आनन्दकाली च ततः प्रभाकाली ततः परम् ।
सूर्यकाली चन्द्रकाली कौमुदीकालिका ततः ॥१२१॥
स्फुलिङ्गकाल्यग्निकाली वीरकाली तथैव च ।
रणकाली हूंहूङ्कारनादकाली ततः परम् ॥१२२॥
जयकाली विघ्नकाली महामार्तण्डकालिका ।
चिताकाली भस्मकाली ज्वलदङ्गारकालिका ॥१२३॥
पिशाचकाली तदनु ततो लोहितकालिका ।
खगकाली नागकाली ततो राक्षसकालिका ॥१२४॥

महागगनकाली च विश्वकाली भवेदनु ।
मायाकाली मोहकाली ततो जङ्गमकालिका ॥१२५॥
पुन स्थावरकाली च ततो ब्रह्माण्डकालिका ।
सृष्टिकाली स्थितिकाली पुनः संहारकालिका ॥१२६॥
अनाख्याकालिका चापि भासाकाली ततोऽप्यनु ।
व्योमकाली पीठकाली शक्तिकाली तथैव च ॥१२७॥
ऊर्ध्वकाली अधःकाली तथा चोत्तरकालिका ।
तथा समयकाली च कौलिकक्रमकालिका ॥१२८॥
ज्ञानविज्ञानकाली च चित्सत्ताकालिकापि च ।
अद्वैतकाली परमानन्दकाली तथैव च ॥१२९॥
वासनाकालिका योगभूमिकाली ततः परम् ।
उपाधिकाली च महोदयकाली ततोऽप्यनु ॥१३०॥
निवृत्तिकाली चैतन्यकाली वैराग्यकालिका ।
समाधिकाली प्रकृतिकाली प्रत्ययकालिका ॥१३१॥
सत्ताकाली च परमार्थकाली नित्यकालिका ।
जीवात्मकाली परमात्मकाली बन्धकालिका ॥१३२॥
आभासकालिका सूक्ष्मकालिका शेषकालिका ।
लयकाली साक्षिकाली ततश्च स्मृतिकालिका ॥१३३॥
पृथिवीकालिका वापि एककाली ततः परम् ।
कैवल्यकाली सायुज्यकाली च ब्रह्मकालिका ॥१३४॥
ततश्च पुनरावृत्तिकाली याऽमृतकालिका ।
मोक्षकाली च विज्ञानमयकाली ततः परम् ॥१३५॥
प्रतिबिम्बकालिका चापि एकपिण्डकाली ततः परम् ।
एकात्म्यकालिकानन्दमयकाली तथैव च ॥१३६॥

सर्वशेषे परिज्ञेया निर्वाणमयकालिका ।
इति नाम्नां सहस्रं ते प्रोक्तमेकाधिकं प्रिये ॥१३७॥
पठतः स्तोत्रमेतद्धि सर्वं करतले स्थितम् ।
सहस्रनाम्नः स्तोत्रस्य फलश्रुतिः ॥
नैतेन सदृशं स्तोत्रं भूतं वापि भविष्यति ॥१॥
यः पठेत् प्रत्यहमदस्तस्य पुण्यफलं शृणु ।
पापानि विलयं यान्ति मन्दराद्रिनिभान्यपि ॥२॥
उपद्रवाः विनश्यन्ति रोगाग्निनृपचौरजाः ।
आपदश्च विलीयन्ते ग्रहपीडाः स्पृशन्ति न ॥३॥
दारिद्र्यं नाभिभवति शोको नैव प्रबाधते ।
नाशं गच्छन्ति रिपवः क्षीयन्ते विघ्नकोटयः ॥४॥
उपसर्गाः पलायन्ते बाधन्ते न विषाण्यपि ।
नाकालमृत्युर्भवति न जाड्यं नैव मूकता ॥५॥
इन्द्रियाणां न दौर्बल्यं विषादो नैव जायते ।
अथादौ नास्य हानिः स्यात् न कुत्रापि पराभवः ॥६॥
यान् यान् मनोरथानिच्छेत् तांस्तान् साधयति द्रुतम् ।
सहस्रनामपूजान्ते यः पठेद् भक्तिभावितः ॥७॥
पात्रं स सर्वसिद्धीनां भवेत्संवत्सरादनु ।
विद्यावान् बलवान् वाग्मी रूपवान् रूपवल्लभः ॥८॥
अधृष्यः सर्वसत्वानां सर्वदा जयवान् रणे ।
कामिनीनां प्रियो नित्यं मित्राणां प्राणसन्निभः ॥९॥
रिपूणामशनिः साक्षाद्दाता भोक्ता प्रियंवदः ।
आकरः स हि भाग्यानां रत्नानामिव सागरः ॥१०॥
मन्त्ररूपमिदं ज्ञेयं स्तोत्रं त्रैलोक्यदुर्लभम् ।

एतस्य बहवः सन्ति प्रयोगाः सिद्धिदायिनः ॥११॥
तान् विधाय सुरेशानि ततः सिद्धीः परीक्षयेत् ।
ताररावौ पुरा दत्त्वा नाम चैकैकमन्तरा ॥१२॥
तच्च ङेऽन्तं विनिर्दिश्य शेषे हार्दमनुं न्यसेत् ।
उपरागे भास्करस्येन्दोर्वाप्यथान्यपर्वणि ॥१३॥
मालतीकुसुमैर्बिल्वपत्रैर्वा पायसेन वा ।
मधूक्षितद्राक्षया वा पक्वमोचाफलेन वा ॥१४॥
प्रत्येकं जुहुयात् नाम पूर्वप्रोक्तक्रमेण हि ।
एवं त्रिवारं निष्पाद्य ततः स्तोत्रं परीक्षयेत् ॥१५॥
यावत्यः सिद्धयः सन्ति कथिता यामलादिषु ।
भवन्त्येते न तावन्त्यो दृढविश्वासशालिनाम् ॥१६॥

(एतत्स्तोत्रस्य प्रयोगविधिवर्णनम्)

परचक्रे समायाते मुक्तकेशो दिगम्बरः ।
रात्रौ तदाशाभिमुखः पञ्चविंशतिधा पठेत् ॥१७॥
परचक्रं सदा घोरं स्वयमेव पलायते ।
महारोगोपशमने त्रिंशद्वारमुदीरयेत् ॥ १८॥
विवादे राजजनितोपद्रवे दशधा जपेत् ।
महादुर्भिक्षपीडासु महामारीभयेषु च ॥ १९॥
षष्टिवारं स्तोत्रमिदं पठन्नाशयति द्रुतम् ।
भूतप्रेतपिशाचादि कृताभिभवकर्मणि ॥२०॥
प्रजपेत् पञ्च दशधा क्षिप्रं तदभिधीयते ।
तथा निगडबद्धानां मोचने पञ्चधा जपेत् ॥ २१॥
बध्यानां प्राणरक्षार्थं शतवारमुदीरयेत् ।
दुःस्वप्नदर्शने वारत्रयं स्तोत्रमिदं पठेत् ॥२२॥

एवं विज्ञाय देवेशि महिमानममुष्य हि ।
यस्मिन् कस्मिन्नपि प्राप्ते सङ्कटे योजयेदिदम् ॥२३॥
शमयित्वा तु तत्सर्वं शुभमुत्पादयत्यपि ।
रणे विवादे कलहे भूतावेशे महाभये ॥२४॥
उत्पातराजपीडायां बन्धुविच्छेद एव वा ।
सर्पाग्निदस्युनृपतिशत्रुरोगभये तथा ॥२५॥
जप्यमेतन्महास्तोत्रं समस्तं नाशमिच्छता ।
ध्यात्वा देवीं गुह्यकालीं नग्नां शक्तिं विधाय च ॥२६॥
तद्योनौ यन्त्रमालिख्य त्रिकोणं बिन्दुमत् प्रिये ।
पूर्वोदितक्रमेणैव मन्त्रमुच्चार्य साधकः ॥२७॥
गन्धपुष्पाक्षतैर्नित्यं प्रत्येकं परिपूजयेत् ।
बलिं च प्रत्यहं दद्यात् चतुर्विंशतिवासरान् ॥२८॥
स्तोत्राणामुत्तमं स्तोत्रं सिद्ध्यन्त्येतावताप्यदः ।
स्तम्भने मोहने चैव वशीकरण एव च ॥२९॥
उच्चाटने मारणे च तथा द्वेषाभिचारयोः ।
गुटिकाधातुवादादियक्षिणीपादुकादिषु ॥३०॥
कृपाणाञ्जनवेतालान्यदेहादिप्रवेशने ।
प्रयुञ्ज्यादिदमीशानि ततः सर्वं प्रसिद्ध्यति ॥३१॥
सर्वे मनोरथास्तस्य वशीभूता करे स्थिताः ।
आरोग्यं विजयं सौख्यं विभूतिमतुलामपि ॥३२॥
त्रिविधोत्पातशान्तिञ्च शत्रुनाशं पदे पदे ।
ददाति पठितं स्तोत्रमिदं सत्यं सुरेश्वरि ॥३३॥
स्तोत्राण्यन्यानि भूयांसि गुह्यायाः सन्ति पार्वति ।
तानि नैतस्य तुल्यानि ज्ञातव्यानि सुनिश्चितम् ॥३४॥

इदमेव तस्य तुल्यं सत्यं सत्यं मयोदितम् ।
नाम्नां सहस्रं यद्येतत् पठितु नालमन्वहम् ॥ ३५॥

(सहस्रनाम्नः पाठाशक्तौ वक्ष्यमाणपाठस्य निदेशः)

तदैतानि पठेन्नित्यं नामानि स्तोत्रपाठकः ।
चण्डयोगेश्वरी चण्डी चण्डकापालिनी शिवा ॥३६॥
चामुण्डा चण्डिका सिद्धिकराली मुण्डमालिनी ।
कालचक्रेश्वरी फेरुहस्ता घोराट्टहासिनी ॥३७॥
डामरी चर्चिका सिद्धिविकराली भगप्रिया ।
उल्कामुखी ऋक्षकर्णी बलप्रमथिनी परा ॥३८॥
महामाया योगनिद्रा त्रैलोक्यजननीश्वरी ।
कात्यायनी घोररूपा जयन्ती सर्वमङ्गला ॥३९॥
कामातुरा मदोन्मत्ता देवदेवीवरप्रदा ।
मातङ्गी कुब्जिका रौद्री रुद्राणी जगदम्बिका ॥४०॥
चिदानन्दमयी मेधा व्रह्मरूपा जगन्मयी ।
संहारिणी वेदमाता सिद्धिदात्री बलाहका ॥ ४१॥
वारुणी जगतामाद्या कलातीता चिदात्मिका ।
नाभान्येतानि पठता सर्वं तत् परिपठ्यते ॥४२॥
इत्येतत् कथितं नाम्नां सहस्रं तव पार्वति ।
उदीरितं फलं चास्य पठनाद् यत् प्रजायते ॥४३॥
निःशेषमवधार्य त्वं यथेच्छसि तथा कुरु ।
पठनीयं न च स्त्रीभिरेतत् स्तोत्रं कदाचन ॥४४॥

॥ इति महाकालसंहितायां विश्वमङ्गलकवचान्तं पूजापद्धतिप्रभूतिकथनं नाम दशमः पटलान्तर्गतं गुह्यकालिसहस्रनामस्तोत्रं सम्पूर्णम् ॥

१३

॥ श्रीगुह्येश्वरीस्तोत्रम् ॥

राजोवाच ॥

कालेश्वर्यै नमो देव्यै भिन्नाञ्जनचयत्विषे ।
नमस्ते कालिके भद्रे गुह्येश्वर्यै नमो नमः ॥१॥
दशास्यपद्मसुन्दर्यै भद्रकाल्यै नमो नमः ।
अष्टोत्तरशताष्टार्धकरायै सततं नमः ॥२॥
सर्वायुधोज्वले देवि मुण्डमालाविभूषिते ।
त्रिँशल्लोचनदीप्तास्ये विद्युज्जिह्वे नमोऽस्तुते ॥३॥
नानाभरणभूषाढ्ये सुकुण्डलोत्तमानने ।
मुक्तामालोत्तमाङ्गिन्यै व्याघ्रचर्मोज्ज्वले नमः ॥४॥
नमस्ते भीमद्रंष्ट्रिन्यै नमोऽसिचर्मधारिणि ।
श्मशाननिलये मातर्विविधास्यैर्विभूषिते ॥५॥
क्षतजैरुक्षितास्यायै पीतासृक्क्लिन्नजिह्विके ।
शवैर्विभूषितायै च शवस्थायै नमो नमः ॥६॥
ब्रह्मामृतैः परैः पुष्पैर्ब्रह्मादिभिः प्रपुजिते ।
ब्रह्मानन्दपदं मोक्षं ददत्यै सेविने नमः ॥७॥
ब्राह्मी माहेश्वरीन्द्राणी कौमारी वैष्णवी परा ।
चामुण्डा शिवदूती च वाराह्येताभिराश्रिते ॥८॥
रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी चण्डिका ताभिराश्रिते ॥९॥
ब्रह्मविष्णुशिवेन्द्राद्यैर्नित्यं प्रसेविते परे ।
भक्तेप्सितप्रदे देवि गुप्तकाली नमोऽस्तुते ॥१०॥

॥ श्रीस्कन्दपुराणे हिमवत्खण्डे पाशुपतक्षेत्रवर्णनप्रकरणे श्रीगुह्येश्वरीस्तोत्रं सम्पूर्णम् ॥

१४

॥ श्रीगुह्यकालीस्तोत्रम् ॥

ॐ नमः श्रीगुह्यकालिकायै ॥

श्रीईश्वरउवाच ॥

अथ वक्ष्य महादेव्या स्तोत्रं सर्वज्ञ भाषितं ।
पठनाद्भक्ति युक्तेन शक्रस्यैश्वर्यमाप्नुयात् ॥०॥
ब्रह्मणा ब्रह्मशब्देन स्तुतात्वं परमेश्वरि ।
इच्छाशक्तिं परां मायां गुह्यकालीं नमाम्यहम् ॥१॥
पालनाय जगद्देवी विष्णुनात्वं परापरां ।
संस्तुताज्ञानशब्देन गुह्यकालीं नमाम्यहम् ॥२॥
अपरां कालरुद्रेन संहारार्थं स्तुता शिवे ।
त्वां क्रियां रुद्रशब्देन गुह्यकालीं नमाम्यहम् ॥३॥
ईश्वरेनलयार्थत्वां स्तुतासिचित्कलेव्यये ।
कलातीतां महामायां गुह्यकालीं नमाम्यहम् ॥४॥
सदाशिवेन सततं स्तुतात्वं परमेश्वरि ।
अनुग्रहाय लोकानां गुह्यकालीं नमाम्यहम् ॥५॥
इदं स्तोत्रं पठेद्यस्तु भक्तियुक्तेन चेतसा ।
तस्मैदद्यात् गुह्यकाली सर्वसिद्धिर्न संशयः ॥६॥
यः श्लोकपञ्चकं देवी नित्यं मनसि धारयेत् ।
सर्वज्ञत्वं लभेद्देवि गुह्यकाली प्रसादतः ॥७॥

यामासाद्य मया देवि प्राप्तासिद्धिरनेकधा ।
ब्रह्मापि सृष्टिकर्त्तात्वं विष्णुः स्यात् पालको भवेत् ॥८॥
संहार कृत्कालरुद्र ईश्वरोलय कृत्सदा ।
वहुनात्र किमुक्तेन सा देवी ध्यान मात्रत ॥९॥
सजीवन्नेव मुक्तिः स्या सत्य सत्यं मयोदितम् ॥१०॥

॥ श्रीगुह्यकालीस्तोत्रं सम्पूर्णम् ॥

१५

॥ श्रीगुह्यकालीक्रमस्तवः ॥

क्रमस्तवं प्रवक्ष्यामि शृणुष्व कमलानने ! ।
ब्राह्मये मुहूर्ते उत्थाय गुरुदेवान्नमेत् सदा ॥१॥
वारुणीमुखमाश्रित्य नमस्कुर्यादुपर्य्यधः ।
गुरुभ्योऽपि नमो नित्यं नमस्तत्पादुकाय च ॥२॥
परं परेभ्यश्च परापरेभ्यः परात्परेभ्योऽपि नमोऽस्तुते च ।
आधारशक्तिं नमस्कृत्य कुलाचलान्नमस्कुर्य्यात् ॥३॥
धर्म्मकर्म्मणे नमस्कृत्य कूर्म्मराजाय वै नमः ।
अनन्ताय नमो नित्यं वराहाय नमो नमः ॥४॥
पृथिव्यै च नमो नित्यं कुलाचलेभ्यो नमो नमः ।
समुद्रेभ्यो नमो नित्यं सरत्नैरमृतैर्जलैः ॥५॥
कुलवृक्षेभ्यो नमो नित्यं कल्पवृक्षेभ्यो नमो नमः ।
स्वर्णसिंहासनेभ्यश्च मणिवेद्यै नमो नमः ॥६॥
चतुर्दिशि नमस्कुर्य्यात् सर्वदेवान् नमस्ततः ।
वेदेभ्योऽपि नमो नित्यं वेदार्थेभ्यो नमो नमः ॥७॥
शाखाभ्यस्तस्य वै नित्यं तत्पादेभ्यो नमो नमः ।
तद्वर्णेभ्यो नमो नित्यं वर्णार्थेभ्यो नमो नमः ॥८॥
असंस्कारपदेभ्यश्च नमो वै परमात्मने ।
विद्याभ्योऽपि नमो नित्यमविद्याभ्यो नमो नमः ॥९॥
शास्त्रेभ्योऽपि नमो नित्यमशास्त्रेभ्यो नमो नमः ।
धर्मेभ्योऽपि नमो नित्यमधर्मेभ्यो नमो नमः ॥१०॥
भागवतेभ्यो नमो नित्यं विद्याभ्योऽपि नमो नमः ।

श्रुतिभ्योऽपि नमो नित्यं श्रुत्यर्थेभ्यो नमो नमः ॥११॥
श्रीरामभागवतेभ्यश्च दण्डवत् प्रणमेत् सदा ।
भागवतेभ्यो नमो नित्यं भागवतार्थेभ्यो नमो नमः ॥१२॥
तत्त्वार्थेभ्यो नमो नित्यं तत्त्वेभ्योऽपि नमो नमः ।
योगेभ्योऽपि नमो नित्यं योगार्थेभ्यो नमो नमः ॥१३॥
संहिताभ्यो नमो नित्यं तदर्थेभ्यो नमो नमः ।
मातृकाभ्यो नमो नित्यं तदर्थेभ्यो नमो नमः ॥१४॥
कलाभ्योऽपि नमो नित्यं शक्तिभ्योऽपि नमो नमः ।
स्वरेभ्योऽपि नमो नित्यं रागेभ्योऽपि नमो नमः ॥१५॥
रागिणीभ्यो नमो नित्यं तदर्थेभ्यो नमो नमः ।
अस्त्रेभ्योऽपि नमो नित्यं शस्त्रेभ्योऽपि नमो नमः ॥१६॥
जीवेभ्योऽपि नमो नित्यं बीजेभ्योऽपि नमो नमः ।
भूचरेभ्यो नमो नित्यं खेचरेभ्यो नमो नमः ॥१७॥
योगेभ्योऽपि नमो नित्यं करणेभ्यो नमो नमः ।
मुहूर्तेभ्यो नमो नित्यं यामेभ्योऽपि नमो नमः ॥१८॥
ऋतुभ्योऽपि नमो नित्यं वत्सरेभ्यो नमो नमः ।
डाकिनीभ्यो नमो नित्यं रुद्रेभ्योऽपि नमो नमः ॥१९॥
भूतेभ्योऽपि नमो नित्यं प्रेतेभ्योऽपि नमो नमः ।
यक्षेभ्योऽपि नमो नित्यं विघ्नेभ्योऽपि नमो नमः ॥२०॥
भूतेभ्योऽपि नमो नित्यं महाभूतेभ्यो नमो नमः ।
आचार्येभ्यो नमो नित्यं शङ्करेभ्यो नमो नमः ॥२१॥
वैष्णवेभ्यो नमो नित्यं ये च मायाविमोहिताः ।
मायायै प्रणमेन्नित्यं प्रत्त्वेभ्योऽपि नमो नमः ॥२२॥
शरीरेभ्यो नमो नित्यं व्यापकेभ्यो नमो नमः ।
मन्त्रेभ्योऽपि नमो नित्यं यन्त्रार्थेभ्यो नमो नमः ॥२३॥
नमो वर्णात्मिकाभ्यश्च देवताभ्यो नमो नमः ।
तत्पदेभ्यो नमो नित्यं सत्पदेभ्यो नमो नमः ॥२४॥

भावनाभ्यो नमो नित्यं भावशास्त्रेभ्य एव च ।
स्तवेभ्यः कवचेभ्यश्च नामभ्योऽपि नमो नमः ॥२५॥
आगमेभ्यो नमो नित्यं तदर्थेभ्यो नमो नमः ।
तत्क्रियाभ्यो नमो नित्यं श्रेष्ठशास्त्रेति कीर्त्त्यते ॥२६॥
रसेभ्योऽपि नमो नित्यं गन्धेभ्योऽपि नमो नमः ।
पीठेभ्योऽपि नमो नित्यं तत्स्थेभ्योऽपि नमो नमः ॥२७॥
सत्त्वेभ्योऽपि नमो नित्यं राजसेभ्यो नमो नमः ।
तामसेभ्यो नमो नित्यं गुणेभ्योऽपि नमो नमः ॥२८॥
सर्वविद्यावतारेभ्यः सिद्धेभ्योऽपि नमो नमः ।
आनन्दकन्दाय नमस्कृत्य कन्दनाय नमो नमः ॥२९॥
सर्वतत्त्वात्मकमलाय प्रकृतिपत्रेभ्य एव च ।
सिद्धपीठाय सत्त्वस्य शवरूपशिवाय च ॥३०॥
त्रिपञ्चाराय चक्राय नमो नित्यं नमो नमः ।
तत्रस्थायै कालिकायै गुह्यायै कामरूपिण्यै ॥३१॥
गुरुकुलादिशक्तिभ्यः कालिकायै नमो नमः ।
नमो नमो नमस्तेऽस्तु परापराभ्यो नमो नमः ॥३२॥
विशालनेत्रां सुरसङ्घवन्दितां सुरासुराभ्यर्च्चितपादपद्माम् ।
नृमुण्डमालाकलिताशताङ्गैः परावरेते प्रभवन्ति सिद्धाः ॥३३॥
स्थूले केचित् प्रवदन्ति सिद्धाः सूक्ष्मेति केचिन्मुनयो वदन्ति ।
तामम्बिकां नौमि विशालनेत्रसुमङ्गलं धेहि मदीयदेहे ॥३४॥
त्वदीयपादाम्बुजमेवमेतत् निषेव्य सिद्धाः प्रभवं प्रयान्ति ।
मातस्तवायं पापात् सर्वशोकदुःखाज्जगज्जनरम्ये ।
ये त्वा ध्यायेयुर्मनसि विधानाः सर्वे ते सकलफलाः ॥३५॥

॥ श्रीविश्वसारतन्त्रे षष्टपटले गुह्यकाल्याःक्रमस्तवः सम्पूर्णम् ॥

१६

॥ श्रीगुह्यकालीमुक्तावलीस्तोत्रम् ॥

श्री गणेशाय नमः ॥

श्रीमहाकालोवाच ॥

कालिकादक्षिणायास्तु सर्वस्तोत्रतमंपरम् ।
महादुखहरं श्रेष्ठं शृणुष्व कमलानाने ॥१॥
आदिर्आद्या भवाशान्ति अनिरुद्धसरस्वती ।
प्रत्यङ्गिरा शिवा भद्रा भद्रकाली भव प्रिया ॥२॥
पूर्णेश्वरी निशेशि च कुब्जिका सिद्धिकालिका ।
सिद्धिलक्ष्मीर्हाटकेशी महात्रिपुरसुन्दरी ॥३॥
भैरवी बगला चण्डी धुमावत्याम्बिका ध्रुवा ।
वाग्वादिनि चोग्रतारा तथा महिषमर्दिनि ॥४॥
कात्यायनी तुम्बुरेशी सुमुखी श्वेतकालिका ।
उग्रचण्डी छिन्नमस्ता षोडशी कौलिनी तथा ॥५॥
बाला च त्रिपुरा लक्ष्मी पार्वती सर्वमङ्गला ।
दुर्गा च भुवनेशी च तथा नीलसरस्वती ॥६॥
पिङ्गला मङ्गला धन्या भ्रामरी भद्रिका तथा ।
उल्का सिद्धा सङ्कटा च विकटा गर्भपालिका ॥७॥
सुभद्रा द्रौपती तीव्रा रुक्मिणी वनकालिका ।
मातृका च चषकरूपा वरुणा महाबला ॥८॥

मुक्तावलि महस्तोत्रं महागोप्यं वरानने ।
वर्णितुनैव शक्नोमि फलं पुण्यं च चाद्रिजे ॥९॥
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।
गोपनीयं सदा भक्त्या पठयते दिने दिने ॥१०॥ ॥

॥ श्रीमहाकालसंहितायां गुह्यकालीमुक्तावलीस्तोत्रं सम्पूर्णम् ॥

१७

॥ श्रीगुह्यकाल्यामहामायास्तवम् ॥

खफ्रैं नमस्तुते जगन्माते महामायास्वरूपिणी ।
या सान्तकाग्नि कुहरोदुस्थिता तेजरूपिणी ॥१॥
फेत्कारनिलयादेवि फेत्काररावरूपिणी ।
फेत्कारज्वलनासस्था ततः फेत्कारमातरः ॥२॥
सूक्ष्मदेहे निरालम्बे परापरतरे शिवे ।
एकाकिनी विश्वमाते नमो निर्वाणदायिनी ॥३॥
महाकुण्डलिनी भिन्ने प्राणाधारस्वरूपिणी ।
षट्चक्रभेदि व्याप्ते त्वं मङ्गलायै नमो नमः ॥४॥
वह्निमण्डलसंस्थाने सूर्यमण्डलभेदिनि ।
सोममण्डलसंस्थाने नमो मङ्गलमङ्गले ॥५॥
एकाकिनी विश्वमाते कालिमण्डलसंस्थिते ।
कालि पञ्चक्रमे नित्ये विश्वलक्ष्मी नमोस्तुते ॥६॥
ह्रीङ्कारेकारिणी नित्ये हूङ्कारपरिनाट्टते ।
फ्रेङ्कारनादसम्भूते नमस्ते कालनाशिनि ॥७॥
जय मङ्गले माता मे जय कालान्तकालहते ।
जय लक्ष्मी जयोद्भूते जय कालि नमोऽस्तुते ॥८॥
गजवक्त्र नमस्तेऽस्तु नमस्ते वटुकाय च ।
क्षेत्रपाल नमस्तेऽस्तु कालासन नमोऽस्तुते ॥९॥
रक्तकाली नमस्तेऽस्तु श्वेतकाली नमोऽस्तुते ।
महाकाली नमस्तेऽस्तु मृत्युकाली नमोऽस्तुते ॥१०॥

भद्रकाली नमो नित्यं पराकाली नमोऽस्तुते ।
मार्तण्डकालिका देवी रुद्रकाली नमोऽस्तुते ॥११॥
हंसकाली नमस्तेऽस्तु कालकाली नमोऽस्तुते ।
व्योमकाली सूर्यकाली नमस्ते जय कालिके ॥१२॥
सृष्टिकाली नमस्तेऽस्तु स्थितिकाली नमोऽस्तुते ।
संहारकालिका देवी नमः फट्काररूपिणी ॥१३॥
अनाख्यायै नमस्तेऽस्तु भासाकाली नमोऽस्तुते ।
गुह्यकाली नमस्तेऽस्तु नमस्ते विश्वमातरः ॥१४॥
अतितेजजगन्माते सिद्धिदायै नमोऽस्तुते ।
नववक्त्रा महाकाली नीलजीमूतसन्निभे ॥१५॥
अष्टोत्तरशतार्धश्च दोर्दण्डेरूपशोभिते ।
सप्तविंशतिमुण्डस्थे नानाशस्त्रैः सुशोभिते ॥१६॥
सिंहफेरूकपित्रृक्षतार्क्षोमकरदन्तिनम् ।
हयन्नरमुखैः काली सर्वाम्नायैः सुपूजिते ॥१७॥
मकारे मालिनीसंस्था एकारे ईश्वरी स्थिता ।
निर्वाणेशी खमारूढा फट्काररेतिकालिका ॥१८॥
मकारे तु महामाया मकारे मोहिनीस्मृता ।
हाकारे चर्चिका देवी चङ्कारे चण्डघण्टिका ॥१९॥
णकारे णीलनी प्रोक्ता डकारे डामरीस्मृताः ।
यकारे वायुकाली च औङ्कारे वेदमातृका ॥२०॥
गकारे गगनेशि च एङ्कारे ऐन्द्रमातृका ।
शकारे शवरी पूज्या वकारे वारुणी स्मृता ॥२१॥
रिकारे सिद्धिदा सेव्या कालिचक्रप्रकाशिनी ।
गणनाथे नक्षत्रेण वटुकेन समन्विता ॥२२॥
ब्राह्मी माहेश्वरी स्कान्दी वैष्णवी दीर्घनासिका ।

वज्रिणी चर्चिका लक्ष्मी पञ्चचक्रे व्यवस्थिता ॥२३॥
भक्षयन्त्या जगत्सर्वमतृप्ताकामरूपिणी ।
या सान्तकारिणी काली कालसङ्कर्षणीं नमः ॥२४॥
या समस्ताज्वद्रूपा नानाकारोमहोल्बणा ।
सा कालग्रासरसिका कालसङ्कर्षणीं नमः ॥२५॥
लेलीह्यमान सुभृशं भीषणा या सुभैरवी ।
तां कालग्रासरसिकां कालसङ्कर्षणीं नमः ॥२६॥
अलात् चक्रवद्विश्वं क्रीडार्थं भ्राम्यते यया ।
तां कालग्रासरसिकां कालकालीं नमाम्यहम् ॥२७॥
ब्रह्माण्डकोटिलक्षाणि भस्मसात्कुरुते यया ।
तां कालग्रासरसिकां गुह्यकालीं नमाम्यहम् ॥२८॥
नौमि काली करालस्या प्रधानाचारिभक्षणिम् ।
क्रीडार्थं या करोच्चित्रां ब्रह्माण्डार्बुदमालिकाम् ॥२९॥

॥ श्रीगुह्यकाल्यामहामायास्तवं सम्पूर्णम् ॥

कृतिरियं कालिकानन्दनाथपादानाम् ॥

जगतजननी श्रीगुह्यकाली

पुस्तक परिचय

प्राचीन काल से भारत भूमि पर शक्ति उपासना का प्रचलन रहा है। प्रबल कलिकाल में महाशक्ति के काली स्वरूप की उपसना प्रशस्त है। भगवती काली के नाना वपुषों में 'गुह्यकाली' का प्राधान्य है। माता गुह्यकाली पौलस्त्य रावण, भगवान रामचन्द्र, भरत जी आदि की ईष्टदेवी हैं। प्रस्तुत ग्रन्थ अथर्व वेद से सम्बद्ध हाहारावतन्त्र के आधार पर गुह्यकाली उपासना का सांगोपांग विवेचन करता है। ग्रन्थ में हाहारावतन्त्र के अनुसार मण्डपप्रवेश, न्यास, भूतशुद्धि, त्रिपात्र स्थापन, सप्तविंशती पीठपूजा, षोडशावरणपूजा, बलिदान, मन्त्रजप, होमपद्धति तथा उद्वासन पर्यन्त गुह्यकालीपूजा का सविस्तार वर्णन किया गया है। पाठकों की सुविधा के लिए मन्त्रभाग 'संस्कृत' में तथा व्याख्या-निर्देश 'हिन्दी' में दिये गये है। सुकुमार साधकों के हितार्थ लघुपूजाविधि का संकलन किया गया है। विविध मातृकाओं के आधार पर ग्रन्थ में अप्रकाशित कई दुर्लभ स्तोत्रों का संकलन किया गया है।

लेखक परिचय

लेखक आगमशास्त्र के अध्येता, शोधकर्ता, ब्लॉगर एवं वक्ता है जो तन्त्रागम की गौरवशाली गुरुपरम्परा से अपना सम्बन्ध रखते है। इन्होनें गुरुपम्परा से वेद तथा तन्त्र का अध्ययन विविध गुरूजनों की निश्रा में किया है। लौकिक शिक्षा, अभियान्त्रिकी, पुरातत्त्व तथा परामनोविज्ञान विषय में ग्रहण की है। आगमशास्त्र एवं आगमिक परम्परा के संरक्षण हेतु इन्हें वर्ष 2024 में 'युवाविप्र परिषद्', उज्जयिनी द्वारा 'आगमाचार्य' की उपाधि से अलंकृत किया गया है। लेखक के द्वारा पूर्व में 02 मूलपुस्तकों का लेखन, दुर्लभ मातृकाओं के आधार पर 08 पद्धतिग्रन्थों का संपादन तथा 25 से अधिक शोधपत्रों का प्रकाशन किया गया है।

Follow for more: @iChaukhambha

चौखम्भा
क्लासिका

WhatsApp Scan
to Order Books

₹ 395.00

ISBN 978-93-91730-78-9
9 789391 730789